सकलशक्तिसंयुतः । सकलवस्तु सङ्गतः ॥
सकलधर्ममार्गभरण - निपुणतुर्यसंज्ञितः ।
सकल - निगम - जलधि - मथन - भवरसविदितः ॥ वि ॥

अवतु नः परात्परः । अवतु नः परेश्वरः ॥
अवतु नः सदा विरिञ्चि - हरिहरामरेश्वरः ।
अखिल - भुवन - जनन - भरण - हरणतत्परः ॥ वि ॥

करुणया पुना त्विमाम् । करुणयेश्वरः शुभाम् ॥
करुणया पुनातु सुगुण - जनविलासिनीं सभाम् ।
कलित - सुजन - हृदय - नळिन - तरणिरुचिनिभाम् ॥ वि ॥

सनिध पाम गामपा । सनिध पाम गामपा ॥
सनिध पाम गाम पधनि - सनिध पाम गामरी ।
गमप - धपम - पमग - मगरि - पमगरिसनिसा ॥ वि ॥

(ततः प्रविशति सूत्रधारः)

सूत्रधारः—(सविनय मुपसृत्य, सभाभिमुख मञ्जलिं बध्वा)

पायात् स वो ऽसुरवधूहृदयावसादः
पादो हरेः कुवलयामलखड्गनीलः ।
यः प्रोद्यतः, त्रिभुवनैकमणेः, रराज
वैदूर्यसङ्क्रम इवाऽम्बरसागरस्य ॥ १ ॥

(पुष्पाञ्जलिं विकीर्य) अलं अतिविस्तरेण ! अहो ! कथ मस्मत्प्रिय-वयस्यः, अनङ्गकोकिलः, अद्याऽपि चिरायते । (नेपथ्याभिमुख मवलोक्य) मारिष ! यदि नैपथ्यविधान मवसितं, तर्हि, इत स्ताव दागम्यताम् ।

(प्रविश्य)

पारिपार्श्वकः—(ससम्भ्रमम्) भाव, अय मस्मि! आज्ञापय त्वार्यः 'को नियोगो ऽनुष्ठीयताम्' इति ।

सूत्र—मारिष, श्रीमद्रनगरमण्डनायमानं श्रीविजितार्या-सभामण्डप मिमं सर्वतः समागत्य, परिचितानेक-प्राचीन-नवीन-कलाकलापा गुणग्राहिणो मनीषिसार्वभौमा रसास्वादसम्पन्न-मानसाः, कि मपि, अस्मिन् महोत्सवदिवसे, अस्मत्-सुगुण विलास-सभया ऽभिनीयमानं रूपकं सम्प्रेक्ष्य, चिरा दस्मान् समभिनन्दितुं प्रतीक्षन्ते खलु समेधमानकौतूहलाः!

पारि—भाव, जयन्ति किल शृङ्गारादिनवरसभरितानि श्रीकाळिदास-भवभूत्यादि-महाकवि-प्रणीतानि बहूनि नाट-कानि! तद् वदेदानीं केन पुना रूपकेण पण्डितपरिषद्, इयं, आवर्जितमना भविष्यतीति ।

सूत्र—पूर्व मेवा ऽह मादिष्टोऽस्मि खलु परिषदा—'सकल विद्वन्निकरसंसेव्यमानः, पीयूषप्रतिस्पर्धिसमुज्वलदमन्दानन्दसन्दा-यकः, अपूर्ववस्तुरचनालङ्कारशोभितः, संस्कृतनाटकमार्गप्रदर्शिना सकलकविकुलसार्वभौमेन श्रीभासमहाकविना विरचितः, हैडिम्ब-वैदग्ध्यापरनामधेयो मध्यम-व्यायोगः, अस्मिन् महोत्सवदिवसे, अभिनयेन युष्माभिः प्रयोजयितव्य' इति ।

पारि—(सकौतुकं) भाव, कोऽयं भासो नाम, य स्ताव देव मतिमात्रं प्रशस्यते?

सूत्र—मारिष,सुविदितः खल्वयं कविकुलशिरोमणिः,सर्वेषु प्राचीनप्रबन्धेषु, स्वविरचितैः सरळ-सरळै र्मधुर-मधुरै र्लोकोत्तर-वर्णनोपलक्षितैः प्रियदर्शिका - बालचरित - प्रतिमानाटकादिभि श्चतुर्विंशति - रूपकैः ! यः किल क्रीष्टुशकात् पूर्वं षष्ठशताब्द्यां,

शकारेः श्रीहर्षापरबिरुदभृद्विक्रमविभोः
सभारत्नं, जात्या समभिगदितो धावक इति ।
उदात्तः स्वस्योक्त्या, सकलहृदयाह्लादजनकः,
प्रसिद्धोऽभूद् भासः प्रथितबहुनाट्यप्रणयनात् ॥२॥

पारि—भाव, नाऽयं महाकवि रेतावन्तं कालं मया श्रुतपूर्वः, नाऽप्यस्य रूपकाणि दृष्टपूर्वाणि ?

सूत्र—मारिष, को त्रा रसिकंमन्यः, अस्य महाकवे रन्यादृशं बुद्धिवैभवं, अत्युदात्तं कवित्वं च, न प्रशंसेत् ?

कालिदास - कविमेण्ठ - रामिलाः
दण्डि - बाणकवि - राजशेखराः ।
हेमचन्द्र - जयदेव - भामहाः
यं गृणन्ति कविताकलानिधिम् ॥ ३ ॥

पारि—तत् किं मस्य भासकवेः रूपकप्रबन्धाः, श्रीकाळि-दासादीनां महाकवीनां नाटकानीव सहृदयहृदयरञ्जकानि भवन्ति?

सूत्र—(विहस्य) मारिष ! किं प्राकृत इव प्रतिभासि ? न ह्येव, अस्य महाकवेः, नाट्यप्रणयनसामर्थ्यं वर्णयितुं सहस्रवदनोऽपि शक्नुयात् !

लोके मालविकाग्निमित्ररुचिता रत्नावलीप्रेक्षणात्
प्रागेवेति 'पुराणं' इत्यनुवचः श्रीकालिदासो ऽब्रवीत् ।
बाणोऽप्याह सुरालयोपमितितं स्तद्वाग्बुधै रर्चिते
त्येवं प्राह स राजशेखरकवि श्चाऽऽर्यं कवीना ममुम् ॥४॥

पारि—भाव, यद्येवं, अन्वर्थ एवाऽयं महाकविः !

यस्तु जात्या धावकोऽपि, भासो भासयते जगत् ।
तत्त्वै रिवाऽऽदिपुरुष श्चतुर्विंशतिरूपकैः ॥ ५ ॥

सूत्र—मारिष, किं बहुना !

भाषासुरम्या गैर्वाणी, तस्यां काव्यं मनोहरम् ।
तत्राऽपि रूपकं रम्यं तत्र भासकवेः कृतिः ॥ ६ ॥

रसभावपरिपोषणे, स्वभावसंवर्णने, नाटकपात्रप्रयोजनकौशले च, नाऽस्य महाकवेः समानः कश्चि द्वर्तते ! प्राचीनार्याणां, तेषां सामयाचारिकधर्माणां च यथावत् सरसतया प्रदर्शने भासकवेः सदृशः कोऽपि न विद्यते, नाऽऽसीत्, न च भविष्यति । नूनं त दिदं सत्य मस्मि न्नेव खलु महाकवौ, यत् सहजप्रियाख्य माङ्गल्यमहाकविं प्रति समभिहित मभियुक्तैः—

"आदर्श इव तेना ऽऽविष्क्रियते प्रकृतिः कृतौ" इति ।

पारि—भाव, नेतः परं संशयलेशोऽपि मे मनसि वर्तते । आवर्जितानि च सकल सामाजिकानां मनांसीति मे निश्चयः! यतः,

विख्यातः कवि रेषः, सेय मपि सारासारवेत्री सभा,
धर्म्ये चारु च मध्यमस्य चरितं, दक्षाः प्रयोगे वयम्।
एकैकं त्वपि वस्तु तावदखिलाह्लादप्रदं, किं पुनः
सर्वे सम्मिळिता गुणाः सुरुचिराः पुण्योदया दत्र नः॥

तन्नाऽस्माकं किमपि परिहास्यते। अनन्तरकरणीयं तावद् दाज्ञापयतु भावः!

सूत्र—मारिष, किमन्यदस्याः सभायाः श्रुतिप्रमोदहेतोः सङ्गीतकात् करणीय मस्ति। तद्, अविलम्बित मारभ्यतां सङ्गीतकम्।

पारि—तथा! (इति गायति)

(सीसपद्यम्)

महनीयचरितेन मार्गेण सञ्चरन्,
मा गृधः कस्या ऽपि मनसि वस्तु;
कुरु सर्वभूतेषु करुणा मकारणां,
सत्य मेव ब्रूहि सङ्कटे ऽपि।
निरतिशयानन्द - नित्यमोक्षामृतं
भवदुःखवर्जितं भव निपीय,
सकललोकेश्वरं सकलसुखास्पदं
प्रणत चिन्तामणिं प्रणम मित्र॥

निरुपमाकाश - निर्गुण - नित्यमुक्त -
सच्चिदानन्दसम्पूर्ण - सर्वशक्ति -
विश्वकारण - निर्मल - विविधरूप -
परमपुरुषं, स सर्वदा पालये न्नः ॥

सूत्र—(सरसावेशम्) अहो ! साधु गीतं! साधु गीतम् !! अनेन सन्दर्भानुबद्धेन गीतिरचनाविशेषेणैव, अस्माभि रिदानीं प्रयुज्यमानः प्रयोगः प्रत्यूहानन्तरेण परिसमाप्तः स्या दिति सुतरा माशंसामहे !

(नेपथ्ये कलकलः)

पारि—(ससम्भ्रमम्) भाव, कोऽयं महान् कलकलः ?

सूत्र—(श्रुतिमभिनीय) अये! किन्नु खलु मयि विज्ञापन व्यग्रे भयार्तानामिव आलापः श्रूयते! अङ्ग! पश्यामि ।

(पुनर्नेपथ्ये)

भो स्तात!—"कोनु खल्वेष करालः !"

पारि—भवतु! विज्ञातम् !

भोः - शब्दोच्चारणेनैव ब्राह्मणोऽयं न संशयः ।
त्रास्यते निर्विशङ्केन केनचित् पापचेतसा ॥ ८ ॥

(पुन रपि नेपथ्ये)

'को नु खल्वेष कराल: ?—कुटिल-
मानुषवेषधर इव काल: ।
हा हा! कि मेतत् स्वरूपम् ?—हन्त!
देहातिभारेण जनयति तापम् ॥'

सूत्र—(निर्वर्ण्य ससम्भ्रमम्) हन्त! दृढं विज्ञातम्! एष खलु पाण्डव - मध्यमस्याऽऽत्मजो हिडिम्बारणिसम्भूतो राक्षसाग्नि:, अकृतवैरं ब्राह्मणजनं वित्रासयति । भो:! कष्टं खलु पत्नीसुत-परिवृतस्य ब्राह्मणस्य वृत्तान्त: ! अत्र हि,

श्रान्तै: सुतै: परिवृत स्तरुणै:, सदारो
वृद्धो द्विजो निशिचरानुगत: स एष: ।
व्याघ्रानुसारचरितो वृषभ: सधेनु:
सन्त्रस्तवत्सक इवा ऽऽकुलता मुपैति ॥ ९ ॥

पारि—भाव, नोचित मत्र स्थातुं, एह्येहि, अनन्तरकर-णीयाय वय मपि सज्जीभवाम: ।

(इत्युभौ निष्क्रान्तौ)

इति
स्थापना
समाप्ता



अथ

हैडिम्ब - वैदग्ध्ये

प्रथमः प्रघट्टकः

देशः—कुरुजाङ्गले पाण्डवाश्रमाभ्यर्णे कश्चन शैलदुर्गमो
वनप्रदेशः, कालः - अपराह्णः

(ततः प्रविशति रौद्रोज्वलवेषेण घटोत्कचेन अनुद्रुतः
सुतत्रयकलत्रपरिवृतो ब्राह्मणः केशवदासः)

कनिष्ठो ब्राह्मणकुमारः— (भीतिं नाटयन् करुणं गायति)
भो स्तात!

को नु खल्वेष कालः?—कुटिल-
मानुषवेषधर इव कालः।
हाहा! किं मेतत् स्वरूपम्?—हन्त!
देहातिभारेण जनयति तापम् ॥ हा ॥

मध्यमो ब्राह्मणकुमारः—(सकौतुकम्) किन्नु खलु भोः!

कोऽयं महाघोरगात्रः?—कोपात्
सायं समायाति सँरक्तनेत्रः ।
हाहा! किं मेतत् स्वरूपम्?—हन्त!
देहातिभारेण जनयति तापम् ॥ हा ॥

ज्येष्ठो ब्राह्मणकुमारः—(ससम्भ्रमम्)

अहह! वित्रासयते ऽस्मान्!—अन्त्य-
दहन इव सन्दिधक्षु रकस्मात् ।
हाहा! किं मेतत् स्वरूपम्?—हन्त!
देहातिभारेण जनयति तापम् ॥ हा ॥

ब्राह्मणपत्नी—(ससाध्वसम्)

नेह सहे क्षणं स्थातुम्!—नाथ!
मोह मुपैमि समेहि नः पातुम् ।
हाहा! किं मेतत् स्वरूपम्?—हन्त!
देहातिभारेण जनयति तापम् ॥ हा ॥

वृद्धब्राह्मणः—(सत्वर मुपसृत्य, निर्वर्ण्य)

नूनं निशाचर एषः!—नोग्र,
दीनं जनं हन्तुं तेऽर्हति रोषः ।
हाहा! किं मेतत् स्वरूपम्?—हन्त!
देहातिभारेण जनयति तापम् ॥ हा ॥

भोः ! को नु खल्वेषः ? (समन्ता दवलोक्य) नूनं तपोवन मिदं, यत्र किल महानुभावाः पाण्डवा वसन्तीति श्रूयते ! क्व पुन रत्र ईदृशानां अविनीतानां सम्भवः ? अहो नु खलु भोः !

अरुणरविकरप्रकीर्णकेशो
भ्रुकुटिपुटोज्वलपिङ्गलायताक्षः ।
स्तडि दिव घनः सकण्ठसूत्रो
युगनिधने प्रतिमाकृति र्हरस्य ॥ १ ॥

ज्येष्ठः—भो स्तात ! को नु खल्वेषः ?

ग्रहयुगळनिभाक्षः पीनविस्तीर्णवक्षाः
कनककपिशकेशः पीतकौशेयवासाः ।
तिमिरनिग्रहवर्णः पाण्डरोद्वृत्तदंष्ट्रः,
नव इव जलगर्भो लीयमानेन्दुलेखः ॥ २ ॥

मध्यमः—क एष भोः !

कलभदशनदंष्ट्रो लाङ्गुलाकारनासः
करिवरकरबाहु र्नीलजीमूतवर्णः ।
हुतहुतवहदीप्तो यः स्थितो भाति भीमः
त्रिपुरपुरनिहन्तुः शङ्करस्येव रोषः ॥ ३ ॥

कनिष्ठः—भो स्तात ! को नु खलु अस्मान् पीडयति ?

वज्रपातो ऽचलेन्द्राणां, श्येनः सर्वपतत्रिणाम् ।
मृगेन्द्रो मृगसङ्घानां, मृत्युः पुरुषविग्रहः ॥ ४ ॥

ब्राह्मणी—आर्यपुत्र ! क एषो ऽस्मान् सन्तापयति ?

सन्दष्टोष्ठ श्चण्डसंरक्तनेत्रो
मुष्टिं कृत्वा गाढमुद्वृत्तदंष्ट्रः ।
गर्जन् भीमं राक्षसो भाति दृप्तः
संवर्ताग्निः सन्दिधक्षु र्यथैव ॥ ५ ॥

घटोत्कचः—(साटोपं परिक्रम्य) भो भो ब्राह्मण! तिष्ठ तिष्ठ !!

किं यासि मद्भयविनाशितधैर्यसारो
विस्रस्तदारसुतरक्षणहीनशक्तेः ।
तार्क्ष्यार्भपक्षपवनोद्धतरोषवह्नि -
तीव्रः कलत्रसहितो भुजगो यथाऽऽर्तः ॥ ६ ॥

भो ब्राह्मणाः ! न गन्तव्यम् ! न गन्तव्यम् ! !

वृद्धः—ब्राह्मणि ! न भेतव्यम् !! पुत्रकाः ! न भेतव्यम् !! सविमर्शा हि अस्य वाणी ।

घटोत्कचः—(आत्मगतम्) भोः ! कष्टम् !

जानामि सर्वत्र , सदा च नाम,
द्विजोत्तमाः पूज्यतमाः पृथिव्याम् ।
अकार्य मेत च्च मया ऽद्य कार्यं
मातु र्नियोगा दपनीतशङ्कम् ॥ ७ ॥

तद्, वित्रासयामि तावदेनान्। एतेषु ब्राह्मणकुमारेषु अन्यतमं मन्मातु राहारार्थ मपनेष्यामि। (प्रकाशम्) भो भो ब्राह्मण-कुमाराः, तिष्ठत! तिष्ठत!!

ब्राह्मणी--(सविनयसम्भ्रमं तेषां मध्यतो गत्वा) प्रसीदतु! प्रसीदतु महानुभावः!! भीमार्जुनाधिष्ठितं खलु तपोवन मिदम्। नाऽर्हति निरपराधिनो ब्राह्मणान् सन्तापयितुं महापुरुषः!

परोपकारः कर्तव्यः प्राणै रपि धनै रपि।
परोपकारजं पुण्यं न स्यात् क्रतुशतै रपि॥ ८॥

घटोत्कचः—(सोत्प्रासम्) किं वदसि भोः!

भीमो वा शरणं वो ऽस्तु! प्रभु र्वा कपिकेतनः।
मच्चक्षुष्पथ मासाद्य सजीवा नैव यास्यथ॥ ९॥

इत इतः!

वृद्धः---ब्राह्मणि, किं न स्मरसि, तत्रभवता जलक्लिन्नेन मुनिनोक्तम् 'अनपेतराक्षस मिदं वनं अप्रमादेन गन्तव्यम्' इति? तदेवेदानी मुत्पन्नं भयम्।

ब्राह्मणी—किं मिदानी मार्यो मध्यस्थवर्ण इव दृश्यते!

वृद्धः—किं करिष्यामि ब्राह्मणोऽहं मन्दभाग्यः?

ब्राह्मणी—(सभयसम्भ्रमम्) ननु विक्रोशामः! अब्रह्मण्य मब्रह्मण्यम्! भो भो हरिहरब्रह्मादयो दैवताः! परित्रायध्वं! परित्रायध्वम्!!

घटोत्कचः—आः !

ब्रह्मा वा भवतु गति र्द्विजप्रवीराः !
युष्माकं निशितपरश्वथः शिवो वा ।
ना ऽलं मा मभिमुख मेत्य सम्प्रहर्तुं
विष्णु र्वा विकसितपुण्डरीकनेत्रः ॥ १० ॥

ब्राह्मणी—हम् ! विपरीतः किल धर्मः, यद् जीवति खल्वयं पापराक्षसः !

वृद्धः—ब्राह्मणि ! समायातो ऽयं घोरः कलियुगो, नाऽत्र संशयः !

घटो—(विहस्य, सगर्वम्) भो भो ब्राह्मणाः ! उच्चैस्तरा माक्रोशन्तु भवन्तः ! सर्व मिद मरण्यरुदित मेव । एष वः सत्यं हनिष्यामि सर्वा नपि । (इति नानाप्रकारै र्विप्रकुटुम्बं वित्रासयति)

मध्यमः—अहह ! कथ मिव समायातोऽयं दुर्भाग्यसमयः सनातनधर्मस्य ! यत्, यत्र पुनः पूर्वं कलितरुद्राक्षमालिकाः, भस्मोद्धूलितविग्रहाः, भगवन्नामामृतरसरसनरसिकरसनाः, विहित-तीर्थसार्थसञ्चरणचरणाः स्वोचिताचाराचरणमात्रव्यसनिनो ब्राह्मणाः सर्वै रपि सप्रश्रयं, सस्तवं, सपादस्पर्शं च सर्वदा प्राण-म्यन्त, तत्रैवेदानी मेते महात्मानः दुराचारभूयिष्ठै रेतादृशैः पापपुरुषैः, निर्भयै र्निर्दयै र्निरनुतापैश्च, सगर्वं, साहङ्कारं, सोन्मादं च, गालिप्रदानपुरःसर मवहेल्यन्ते, अवधीर्यन्ते, तिरस्क्रियन्ते,

ताड्यन्ते, पीड्यन्ते, निःसार्यन्ते च! हा! धिगस्मत्-क्षत्रियप्रवीरान्! ये दुराचारहतकाना मेतेषा मधर्माचरणं, धर्मातिक्रमणं च तूष्णी मीक्षन्ते, सहन्ते क्षमन्ते च! (निःश्वस्य) आः! ग्रहा एव प्रतिकूलाः! विधि रेव वामः! समय एव अशुभमयः! अदृष्ट मेव निकृष्टम्! भवितव्य मेव निन्दितव्यं सनातनधर्मस्य! तद् व्यर्थोऽयं वदनमलिनीकारो महात्मनां विनिन्दनेन!

घटो— (मध्यमस्य धृष्टता मवलोक्य सकौतुक मात्मगतम्) अहो! गम्भीरानुभावोऽयं ब्राह्मणकुमारः!

कोपेन प्रविधूतकुन्तलभरः सर्वाङ्गजो वेपथुः,
किञ्चित् कोकनदच्छदेन सदृशे नेत्रे स्वयं रज्यतः।
धत्ते कान्ति मिदं च वक्त्र मनयो र्भङ्गेन कान्तभ्रुवोः,
चन्द्रस्योद्भटलाञ्छनस्य, कमलस्योद्भ्रान्तभृङ्गस्य च॥

(प्रकाशम्) भो महाब्राह्मण! कि मेभिः प्रलापैः? रक्ष! रक्षा ऽऽत्मानं यदि ते प्रभावो वर्तते! (इत्युग्रेण चक्षुषा मध्यमं पश्यति)

वृद्धः—(सान्त्वयन्) आः पुरुष! क स्तवाऽयं दोषः? क्रूरतमोऽयं कलिः।

ब्राह्मणी— (सभय मात्मगतम्) हा! अशरणाः स्मः! अभद्राणि भाग्यानि! अभव्यं भाव्यम्! अधःपतनोन्मुखी ब्राह्मणसम्पत्तिः! (प्रकाशम्) अनाथस्या ऽस्य ब्राह्मणकुटुम्बस्य प्रसादं कर्तु मर्हति महापुरुषः!

घटो—(आत्मगतम्) 'महापुरुष' इति स्मृतिपथ मिदानी मागतं मे मातु र्वचनम्। एते विप्रवटव स्तादृशलक्षणोपेता एव दृश्यन्ते। त न्नून मेते ष्वेकतमः अम्बाया मे उपवासपारणार्थ माहारयोग्यो भवेत्। (इति साकूतं मध्यमं पश्यति)

मध्यमः—भवति, कस्य वा वयं विक्रोशामः?

इदं हि शून्यं तिमिरोत्करप्रभैः
नगप्रकारै रवरुद्धदिक्पथम्।
खगै र्मृगै श्चाऽपि समाकुलान्तरं
वनं निवासाभिमतं मनस्विनाम्॥ १२॥

वृद्धः—ब्राह्मणि, न भेतव्यम्! न भेतव्यम्!! मनस्विजननिवासयोग्यमिति श्रुत्वा विगत इव मे सन्त्रासः। शङ्के, नाऽत्र, अतिदूरेण पाण्डवाश्रमेण भवितव्यम्। पाण्डवा स्तु,

युद्धप्रिया श्च, शरणागतवत्सला श्च,
दीनेषु पक्षपतिताः, कृतसाहसा श्च।
एवंविधप्रतिभयाकृतिचेष्टितानां
दण्डं यथार्ह मिह धारयितुं समर्थाः॥ १३॥

ज्येष्ठः—भो स्तात, न तत्र पाण्डवा इति मन्ये।

ब्राह्मणी—पुत्र, कथं त्वं जानीषे?

ज्येष्ठः—अम्ब! तस्मा दाश्रमा दागतेन केन चिद् ब्राह्मणेन कथितम् - 'शतकुम्भं नाम यज्ञ मनुभवितुं महर्षे धौम्यस्य तपोवनं गताः' इति ।

ब्राह्मणी—हन्त! हताः स्मः! अनाथाः स्मः !!

ज्येष्ठः—मातः, न तु सर्व एव । आश्रमपरिपालनार्थं इहैव स्थापितः किल पाण्डवमध्यमः ।

वृद्धः—यद्येवं, सन्निहिताः सर्व एव पाण्डवाः!

ज्येष्ठः—स चाऽस्यां सायन्तनवेलायां व्यायामपरिचयार्थं विप्रकृष्टदेश इति श्रूयते ।

ब्राह्मणी—हन्त! निराशाः स्मः!

वृद्धः—भवतु, व्यपश्रयिष्ये तावदेनम् ।

मध्यमः—अल मलं परिश्रमेण!

प्रार्थना ऽधिगुणे पुंसि निष्फलाऽपि वरं मनाक् ।
नाऽधमे लब्धकामाऽपि! न याच्ञां कर्तु मर्हथ ॥ १४ ॥

ब्राह्मणी—पुत्र, महानुभावदर्शनोऽयं राक्षसप्रवीरः! नाऽत्र परिहीयते खलु प्रार्थना ।

वृद्धः—आम्! वत्स!

यत्ने कृते यदि न सिध्यति कोत्र दोषः?
को वा न सिध्यति ममेति करोति कार्यम् ।
यत्नैः शुभैः पुरुषता भवतीह नृणां
दैवं विधान मनुगच्छति कार्यसिद्धिः ॥ १५ ॥

मध्यमः—अयि भोः! वरं मरण मपि, न तु सर्वथा याचना!

याचना हि पुरुषस्य महत्वं
नाशयत्यखिल मेव! तथा हि।
सद्य एव भगवा नपि विष्णु
र्वामनो भवति याचितु मिच्छन्॥ १६॥

वृद्धः—भवतु! पश्याम स्तावत्। भोः पुरुष, अस्त्यस्माकं मोक्षः?

घटोत्कचः—मोक्षो ऽस्ति, समयतः।

वृद्धः—कः पुनः समयः?

घटोत्कचः—अस्ति मे तत्रभवती जननी, तयाऽहं माज्ञप्तः-'पुत्र, ममोपवासनिसर्गार्थं कश्चि दस्मिन् वनप्रदेशे महापुरुषः, परिमृग्य, आनेतव्य' इति! ततो मया आसादितो भवान् स-कुटुम्बः। एते च तव पुत्राः महापुरुषा एव लक्ष्यन्ते। तस्मात्,

पत्न्या चारित्रशालिन्या द्विपुत्रो मोक्ष मिच्छसि।
बलाबलं परिज्ञाय पुत्र मेकं विसर्जय॥ १७॥

(इति मध्यम मेव साभिलाषं निर्वर्णयति)

वृद्धः—हं भो राक्षसापसद!

कि महं श्रुतवान् वृद्धः पुत्रं शीलगुणान्वितम्।
पुरुषादस्य दत्वा हा! कथं निर्वृति माप्नुयाम्॥ १८॥

घटोत्कचः—(उद्धतं पर्यटन्) अयि भो वृद्धब्राह्मण!

यद्यर्थितो द्विजश्रेष्ठ! पुत्र मेकं न मुञ्चसि।
सकुटुम्बः क्षणेनैव विनाश मुपयास्यसि ॥ १९ ॥

वृद्धः—(चिन्तां नाटयन्) किं मत्र प्रतिविधेयम्? (सविमर्शम्) एष एव मे निश्चयः!

कृतकृत्यं शरीरं मे, परिणामेन जर्जरम्।
राक्षसाग्नौ सुतापेक्षी होष्यामि विधिसंस्कृतम् ॥ २० ॥

ब्राह्मणी— आर्यपुत्र! मा मैवम्!! पतिमात्रधर्मिणी पतिव्रतेति नाम!

पतिर्हि देवता नार्याः! पतिर्बन्धुः! पतिर्गुरुः।
प्राणैरपि प्रियं तस्माद् भर्तुः कार्यं विशेषतः ॥ २१ ॥

तद्, गृहीतफलेन, एतेन मम शरीरेण, आर्यं, कुलं च रक्षितु मिच्छामि।

घटोत्कचः—भवति, न खलु स्त्रीजनोऽभिमत स्तत्रभवत्या।

वृद्धः—अह मनुगमिष्यामि भवन्तम्।

घटोत्कचः—आ! वृद्ध स्त्वं! अपसर! अपसर!!

ज्येष्ठः—भो स्तात, ब्रवीमि खलु तावत् किञ्चित्।

वृद्धः—पुत्र! कथय।

ज्येष्ठः—(सविनयम्)

मम प्राणै र्गुरुप्राणान् इच्छामि परिरक्षितुम् ।
रक्षणार्थं कुलस्याऽस्य, मोक्तु मर्हति मां भवान् ॥ २२ ॥

ब्राह्मणी—हा पुत्र ! वृद्धौ मातापितरौ, प्रिया वनुजौ च परित्यज्य, कथं लोकान्तरं गन्तुं पर्यवसितोऽसि !

मध्यमः—आर्य ! मा मैवम् !!

ज्येष्ठः श्रेष्ठः कुले लोके पितृणाञ्च सुसम्मियः ।
ततो ऽह मेव यास्यामि गुरुवृत्ति मनुस्मरन् ॥ २३ ॥

कनिष्ठः—आर्यौ ! मा मैवम् !

ज्येष्ठो भ्राता पितृसमः कथितो ब्रह्मवादिभिः ।
ततोऽहं कर्तु मस्म्यर्हो गुरूणां प्राणरक्षणम् ॥ २४ ॥

ब्राह्मणी—(सबाष्पम्)

मामिकेयं तनु र्नूनं सृष्टा दुःखाय भूतले ।
धाःगा, यस्या स्तथा मेऽद्य दुःखमूर्तिः प्रदृश्यते ॥ २५ ॥

ज्येष्ठः—(कनिष्ठं प्रति) वत्स ! मा मैवम् !

आपदं हि पिता प्राप्तो ज्येष्ठपुत्रेण तार्यते ।
ततोऽह मेव यास्यामि गुरूणां प्राणरक्षणात् ॥ २६ ॥

वृद्धः—ज्येष्ठ मिष्टतमं न शक्नोमि परित्यक्तुम् !

ब्राह्मणी—यथा आर्यपुत्रो ज्येष्ठ मिच्छति, तथा अहमपि कनिष्ठ मिच्छामि ।

मध्यमः—(सहर्षमात्मगतम्) अहो! प्राप्तावसरो मे चिराभिलषितः परार्थसम्पादनामनोरथः!

मेदोमज्जाशोणितैः पिच्छिले ऽन्त
स्त्वक्प्रच्छन्ने स्नायुबद्धास्थिसन्धौ।
साधु देहे कर्मचण्डालगेहे
बध्नात्युग्रत्पूतिगन्धे रतिं कः॥ २७॥

(प्रकाशं सस्मितम्) पित्रो रनिष्टः कस्येदानीं प्रियः?

घटोत्कचः—(आत्मगतम्) अहो जगद्विपरीत मस्य महासत्त्वस्य चेतः! कुतः,

विश्वामित्रः श्वमांसं श्वपच इव पुराऽभक्षय द्यन्निमित्तं
नाडीजङ्घे निजघ्ने कृततदुपकृति र्यत्कृते गौतमेन।
पुत्रः श्रीकाश्यपस्य प्रतिदिन मुरगा नत्ति ताक्ष्यों यदर्थं
प्राणां स्ता नेष साधु स्तृण मिव कृपया यः परार्थं जहाति॥

अय मेव ब्राह्मणकुमारो मात्रोदिष्टैः सर्वै रपि महापुरुषलक्षणै रुपेतो वर्तते। अय मेव काम मम्बाया अभिमत आहारो भवेत्। (प्रकाशम्) भो ब्राह्मणकुमार, अहं प्रीतो ऽस्मि। शीघ्र मागच्छ।

मध्यमः—(सहर्षम्) हन्त भोः!

धन्यो ऽस्मि यद् गुरुप्राणाः स्वैः प्राणैः परिरक्षिताः।
बन्धुस्नेहा द्धि महतः कालस्नेह स्तु दुर्लभः॥ २८॥

घटोत्कचः—(आत्मगतम्) अहो स्वजनवात्सल्य मस्य ब्राह्मणवटोः!

ब्राह्मणी—भोः क विशा मीदानीं मन्दभागधेया?

किं नु पापं कृतं पूर्वं? का वा पुत्रै र्वियोजिता?।
याऽहं शुद्धसमाचारा त्यक्ष्यामि प्रिय मात्मजम्॥ २९॥

वृद्धः—कष्टं भोः कष्टम्!

प्राणाः प्रयान्ति, परित स्तमसाऽऽवृतो ऽस्मि,
मर्मच्छिदो मम रुजः प्रसर न्त्यपूर्वाः।
अक्ष्णो र्मुखेन्दु मुपधेहि, गिर श्च देहि,
हा पुत्र! मय्यकरुणः सहसैव मा भूः॥ ३०॥

घटो—(आत्मगतम्) अहो नु खल्वेतयोः पुत्रवात्सल्यम्!

मध्यमः—भो स्तात, अभिवादये। (इति साष्टाङ्गं प्रणमति)

वृद्धः—(सविषादम्) हा धिक्!

अश्मसार मिदं नूनं! अथवा ऽप्यजरामरम्।
हृदयं मम येनेदं न दुःखेना ऽवशीर्यते॥ ३१॥

(आत्मानं कथञ्चित् संस्तभ्य) अथवा नैष समयो विषादस्य। एह्येहि पुत्र! दृढं परिष्वजस्व माम्। (उत्थाप्य, सस्नेहं परिष्वज्य) वत्स! आयुष्मान् भव! अयं पश्चिम स्ते पितुः प्रणयपरिष्वङ्गः!

विनिमाय गुरुप्राणान् स्वैः प्राणै र्गुरुवत्सल ।
अकृतात्मदुरावापं ब्रह्मलोक मवाप्नुहि ॥ ३२ ॥

ब्राह्मणी—(साश्रुं रुदती)

सत्यं बतेदं प्रवदन्ति लोके
ना ऽकालमृत्यु र्भवतीति सन्तः ।
यत्रा ऽह मेवं परिभूयमाना
जीवामि किञ्चित् क्षणम प्यपुण्या ॥ ३३ ॥

मध्यमः—(मातर मुपसृत्य) अम्ब! अभिवादये । (इत्यभिवादयते)

ब्राह्मणी—(सशोकावेगम्) अहो दारुणो दैवदुर्विपाकः!

सुखा द्विहीनं बहुदुःखपूर्णं
इदं तु नूनं हृदयं स्थिरं मे ।
विशीर्यते ! य न्न सहस्रधा ऽद्य
वज्राहतं शृङ्ग मिवा ऽचलस्य ॥ ३४ ॥

मध्यमः— (मातरं सान्त्वयन्) अम्ब! अनतिक्रमणीये धैर्य मवलम्ब्यताम्!

जातस्य हि ध्रुवो मृत्युः! ध्रुवं जन्म मृतस्य च ।
तस्मा दपरिहार्ये ऽर्थे न त्वं शोचितु मर्हसि ॥ ३५ ॥

ब्राह्मणी—वत्स! कथं त्वां मृत्यवे ददामि!

जन्मनः प्रभृति पोषितं प्रियं
सौहृदा दपृथगाशयं सुतम् ।
ओतवे गृहशुकार्भकं यथा
निर्घृणा परिददामि मृत्यवे ! ॥ ३६ ॥

मध्यमः—अम्ब! नाऽय मवसरः शोकस्य, विचारस्य वा! सुष्ठ्वभिहितं खल्वभियुक्तैः—

"त्यजे देकं कुलस्याऽर्थे, ग्रामस्याऽर्थे कुलं त्यजेत् ।
ग्रामं जनपदस्याऽर्थे, आत्मार्थे पृथिवीं त्यजेत् ॥३७॥"

इति । तद्, अम्ब! समाश्वस्य साशीर्वादपूर्वकं स्निग्धेन भावेन प्रेष्यता मयं जनः परलोकसुखानुभवाय ।

यदृच्छया चोपपन्नं स्वर्गद्वार मपावृतम् ।
सुखिनः श्रोत्रिया मातः! लभन्ते मृत्यु मीदृशम् ॥ ३८ ॥

घटो—(आत्मगतम्) सत्य माकुलीभूतोऽस्मि महासत्त्वस्याऽस्य ब्राह्मणकुमारस्य धर्मोपन्यासेन!

कृत्ययो र्विप्रतीपत्वाद् द्वैधीभवति मे मनः ।
यथा नभसि तोये च चन्द्रबिम्बं द्विधाकृतम् ॥ ३९ ॥

ब्राह्मणी—(कृच्छ्रेण समाश्वस्य, पुत्रं परिष्वज्य) हा पुत्र! परिष्वजस्व मां मन्दभागिनीम्!

अपूर्वकर्मचण्डाळी मयि वत्स! विमुञ्च माम् ।
श्रितोऽसि चन्दनलताभ्रान्त्या त्वं विषवल्लरीम् ॥ ४० ॥

जात! चिर ञ्जीव! अयं चरम स्ते मातुः परिष्वङ्गः ।

मध्यमः—अम्ब! अनुगृहीतो ऽस्मि । इदानी मेवा ऽहं धन्य श्चाऽस्मि संवृत्तः । (ज्येष्ठ मुपगम्य) आर्य! अभिवादये ।

ज्येष्ठः—एह्येहि वत्स!

परिष्वजस्व गाढं मां, परिष्वक्तः शुभै र्गुणैः ।
कीर्त्या तव परिष्वक्ता भविष्यति वसुन्धरा ॥ ४१ ॥

(इति गाढ मालिंगति)

मध्यमः—अनुगृहीतो ऽस्मि ।

कनिष्ठः—आर्य! अभिवादये । (इत्यभिवादयते)

मध्यमः—एह्येहि वत्स! स्वस्ति! दीर्घायुष्मान् भव!

अमृताघ्मातजीमूतस्निग्धसंहननस्य ते ।
परिष्वंगाय वात्सल्या दय मुत्कण्ठते जनः ॥ ४२ ॥

(इति कनिष्ठं परिष्वजति)

कनिष्ठः—अनुगृहीतोऽस्मि ।

मध्यमः—(घटोत्कचं प्रति) भोः पुरुष, ब्रवीमि किञ्चित्?

घटोत्कचः—ब्रूहि, ब्रूहि शीघ्रम् ।

मध्यमः—नाऽतिदूरे ऽस्मिन् वनान्तरे जलाशय इव दृश्यते । तत्र तावद् गत्वा, सायंसन्ध्या मुपास्य, प्रकल्पितपरलोकस्य पिपासाप्रतीकारं कर्तु मिच्छामि ।

घटोत्कचः—भो दृढव्यवसायिन! गम्यताम् । यथा ना ऽतिक्रामति मातु राहारकालः, तथा शीघ्र मागच्छ!

मध्यमः— भो स्तात! भो अम्ब! भो भ्रातरौ! एष गच्छामि। (इति निष्क्रान्तः)

सर्वे—शिवा स्ते पन्थानः सन्तु! (इति तमेव पश्यन्तः स्तब्धा श्चिरं तिष्ठन्ति)

घटोत्कचः—अह मपि तमेनं ब्राह्मणकुमार मनुगच्छामि। (इति निष्क्रान्तः)

वृद्धः—(तन्मार्ग एव दत्तदृष्टिः) हा! परिमुषिताः स्मः! परिभूतास्मो दैवहतकेन!

य स्त्रिशृङ्गो मम त्वासीत् मनोज्ञो वंशपर्वतः।
तन्मध्यशृङ्गभङ्गेन मन स्तपति मे भृशम्॥ ४३॥

हा पुत्र! कथं गत एव!

तरुण! तरुणतानुरूपकान्ते!
नियमपराध्ययनप्रसक्तबुद्धे।
कथ मिह गजराजदन्तभग्नः
तरु रिव यास्यसि पुष्पितो विनाशम्॥ ४४॥

(इति मूर्च्छति)

ब्राह्मणी— (सोद्वेगम्) हा पुत्र! अनघचारित्र! हा अप्रतिमप्रभाव! मुषिता ऽस्मि, परिभूता ऽस्मि दग्धभागधेयेन!

हा वत्स! हा तनय! हा जगदेकबन्धो!
हा जात! हा चपल! हा करुणैकसिन्धो।
हा पुत्र! हा सुगत! हा सुकृतैकभूमे!
हा हा! कदा नु भविता ऽसि पदं दृशो मे॥४५॥

(सर्वतो विलोक्य) हा धिक्! हा धिक्!! कथं परलोक मेव प्रस्थितो वत्सः! हा पुत्रक! (सकरुणं गायन्ती)

एकश इह मम - माठरकुलमणे! ब्राह्मण
निकटीभव गुणसिन्धो।
दर्शय निजमुखं - ओषधिपतिरुचिं
आर्तिसमाकुलबन्धो॥

वीक्ष्य तवा ऽऽस्य - विधुं ललितं म्रिये
एषा चिर मतिकष्टा।
केशवदाससती - रुदती खलु
नम्रमुखी शुभदिष्टा॥

(इति मोह मुपगच्छति)

कनिष्ठः— (पितरौ दृष्ट्वा सशोकावेगम्) आर्य असंविज्ञात मनिबन्धनं अन्धतमस मिव प्रविशामि! धारय माम्। (इति ज्येष्ठेन हस्ताभ्या मवलम्बितो मूर्च्छति)

ज्येष्ठः—हा कष्टम्! उन्मत्तीभूत मिव मे हृदयम्। हा! किं करोमि मन्दभाग्यः? (प्रळय मभिनयन्)

निकृन्ततीव मर्माणि, देहं शोषयतीव मे।
दहतीवा ऽन्तरात्मानं क्रूरः शोकाग्नि रुत्थितः॥ ४६॥

अहो ध्वस्ता धीरता! स्रस्ता स्वतन्त्रता! प्रणष्टा ब्राह्मणसम्पत्तिः! विनष्टा धर्मप्रतिपत्तिः! (सर्वतोऽवलोक्य) हा धिक्! कष्टम्!! कथं गत एव मे प्रियसहोदरः?

देशे देशे कळत्राणि देशे देशे च बान्धवाः।
तं तु देशं न पश्यामि यत्र भ्राता सहोदरः॥ ४७॥

हन्त! विपन्नस्तः संप्रति जीवलोकः! हा वसुन्धरे! किं दीनानां रक्तैरेव स्नास्यसि? हा पुण्यभूमे! किं दुराचारहतकैरेव भोक्ष्यसे? हा सनातनधर्म! किं विलयमेव यास्यसि? हा ब्राह्मण्य! किं कथावशेषमेव भविष्यसि? (सविमर्शम्) हन्त! भगवन्! महति दुराचारे प्रवृत्ते—

"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ ४८॥"

इति प्रतिज्ञातवानसि! तत्, किमितोऽप्यधिकतरं दुराचारमपेक्षसे? अहह! नाऽधुनाऽपि तव हृदये दया सञ्चरति? भगवन्! किमिति 'दीनबन्धु' पदेन सम्बोध्यसे? यस्याऽस्य निरपराधिनो ब्राह्मणकुटुम्बस्य दीनतामवलोक्य ग्रावाणोऽपि रुदन्ति, तस्योपरि करुणामयीं दृष्टिमपि न क्षिपसि? हन्त! कियच्छयिष्यसे! कथमस्माकं महाक्रन्दनकोलाहलैरपि न विद्राव्यते तव निद्रा? हा! तवाऽपि कथं व्यामोहः? गरलं तु धूर्जटिना पीतम्! मद्यं च दानवैरास्वादि! किन्तु, चित्रं! यदेष विलक्षण स्त्वयि दृश्यते व्यामोहः! अथवा, तस्यैव महागरळस्य महामद्यस्य च

भगिन्या कनकाङ्गदस्य समालिङ्गित इति, पन्नगकुलमूलस्य शेष-
नागस्य गरळावलीढै र्निःश्वासैः प्रतिरोमकुहरं रञ्जित इति च,
कलयसि कांचि न्मूर्छां मत्ततां च । कथ मन्यथा, क्षीरधिवेष्टित
एव क्षीरधिकन्यया रमेथाः ! (सविचारम्) किन्तु मैवम् ! क्षम-
स्वैना मनल्पजल्पकल्पनाम् । 'सर्वत्रैवाऽसि, सर्वान् पश्यसि, सर्वं
वेत्सि, सर्वेषु दयसे' इति सन्त्यत्र परःसहस्राणां प्रामाणिकानां
वचनानि । येषु विश्वस्य, तव सत्ताऽङ्गीक्रियते; कथं तेष्वेव वि-
श्वस्य, तवेतरगुणिता नाऽङ्गीकरिष्यते ? परं, अहह ! पश्यन्नपि,
विदन्नपि न दयसे ? हन्त ! किं कथ्यते, जगदीश्वरोऽसि ! तत्
किं गजोद्धारधावनस्थगितोऽसि, य न्न धावसि ? विप्रारावणहनन-
वनवासव्रीडितोऽसि, य न्नाऽवतरसि ? कंसच्छेदनायासस्मरणेन वा
तूष्णीकोऽसि, य दभयं न ददासि ? चिरन्तन इति वलीपलित-
विग्रहो वा सम्पन्नोऽसि, य न्नाऽऽविर्भवसि ? न ज्ञायते तत्त्वम् ! या
दृश स्त्वं, तादृश मेव वयं नमस्कुर्मः । प्रभो प्रणतार्तिहर ! दयस्व !
दयस्व !! वरदराज वन्दारुजनमन्दार ! क्षमस्वाऽस्मान् क्षमस्व !!
हा गदाधर ! कदा तव कौमोदकी मोदं जनयिष्यति ? अहो शार्ङ्ग-
हस्त ! कदा तव चाप स्तापं विलयं यापयिष्यति ? हहा ! सुदर्शनो-
ज्वल ! कदा तव चक्रं दुष्टचक्रं चङ्क्रमिष्यते ? आहो खड्गपाणे !
कदा तव नन्दकः साधु बृन्दा नन्दयिष्यति ? मा स्म भगवन् !

अस्मदपराधा न्क्षमार्षीः! पाहि! पाहि!! परमात्मन् पाहि!!!

(इति ध्यानलय मुपैति)


ति

(तिरस्करिणी शनै र्निपतति, सर्वोऽपि ब्राह्मणकुटुम्ब वर्गः मूर्छित एव मन्दमन्दं तिरोभूतो निष्क्रान्तः)

इति

प्रथमः प्रघट्टकः

समाप्तः





अथ

हैडिम्ब - वैदग्ध्ये

द्वितीयः प्रघट्टकः

देशः—तत्रैव कोऽपि जलाशयः; कालः—सूर्यास्तमयसमयः

(ततः प्रविशति प्रशान्तगम्भीरो मध्यमः)

मध्यमः—(सविचारम्) रे रे! मानस!

मृत्यो र्बिभेषि किं मूढ! भीतं मुञ्चति किं यमः? ।
अजातं नैव गृह्णाति! कुरु यत्न मजन्मनि ॥ १ ॥

हन्त! क्षणभङ्गुरं खलु प्राणिनां जीवितम्!

मरणं प्रकृतिः शरीरिणां
विकृति र्जीवन मुच्यते बुधैः ।
क्षणम प्यवतिष्ठते श्वसन्
यदि जन्तु र्ननु लाभवा नसौ ॥ २ ॥

अहो नु खलु भोः!

श्रियो दोलालोलाः, विषयजरसाः प्रान्तविरसाः,
विपद्रेहं देहं, महदपि धनं भूरि निधनम् ।
बृहच्छोको लोकः, सतत मबला दुःखबहला,
तथा ऽप्यस्मिन् घोरे पथि बत! रता हन्त कुधियः!॥

रे रे मुग्धजीव! किं मेवं व्यर्थं कालं क्षिपसि?

आयुः कल्लोललोलं, कतिपयदिवसस्थायिनी यौवनश्रीः,
अर्थाः सङ्कल्पकल्पाः, घनसमयतटिद्विभ्रमा भोगपूगाः।
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत् प्रियाभिः प्रणीतं,
ब्रह्मण्यासक्तचित्तो भव भवभयाम्भोधिपारं तरीतुम् ॥

अथवा,

प्राप्ताः श्रियः सकलकामदुघा स्ततः किम्?
सम्मानिताश्च विभवैः सुहृद स्ततः किम्?।
न्यस्तं पदं शिरसि विद्विषतां ततः किं?
कल्पं स्थितं तनुभृता मसुभि स्ततः किम्?॥ ५ ॥

(सपरितोषम्) हन्त! सम्पन्नः खलु मे चिराभिलषितो मनोरथः!

संरक्षता मत्कुल मद्य पुण्यं
मयाऽऽर्जितं यत् स्वशरीरदानात्।
भवे भवे तेन ममैव भूयात्
परोपकाराय शरीरलाभः॥ ६ ॥

अहो कृतार्थो ऽस्मि सम्प्रति!

मात र्मायें, भगिनि कुमते, हे पित र्मोहजाल,
व्यावर्तध्वं! भवतु भवता मेष दीर्घो वियोगः ।
सद्यो लक्ष्मीरमणचरणभ्रष्टगंगाप्रवाह -
व्यामिश्रायां दृषदि परमब्रह्मदृष्टि र्भवामि ॥ ७ ॥

(परिक्रम्य समन्ता दवलोक्य सकौतुकम्) अहो नु खलु प्रशान्तर-मणीयता ऽस्य तपोवनस्य । इह हि,

मधुर मिव वदन्ति स्वागतं भृङ्गनादैः,
नति मिव फलनम्रैः कुर्वते ऽमी शिरोभिः ।
घम ददत इवा ऽर्घ्यं पुष्पवृष्टिं किरन्तः,
कथ मतिथिसपर्यो शिक्षिताः शारिनो ऽपि ॥ ८ ॥

(स्पर्शसुख मभिनीय सहर्षम्) अहो प्रवातसुभगोऽयं वनोद्देशः!

कुसुमपरिमलेना ऽऽमोदितालि लतानां
वलितकिसलयानां लास्यलीलोपदेशै ।
लुलितकुवलयालिः शीकरासारवोढा
मृदुमलयसमीरो वाति सायन्तनो ऽयम् ॥ ९ ॥

त न्नाऽऽसन्दूरे ऽत्र कासारेण तरङ्गिण्या वा भवितव्यम् । (अग्रतो विलोक्य) अहो! अकृतज्ञता तरङ्गिण्याः!

छायां प्रकुर्वन्ति, नमन्ति पुष्पैः,
फलानि यच्छन्ति तटद्रुमा ये ।
उन्मूल्य ता नेव नदी प्रयाति
तरङ्गिणां क प्रतिपन्न मस्ति ॥ १० ॥

(ऊर्ध्व मवलोक्य) अहो! सूर्यास्तमयसमयोऽयम्!

मन्त्रसंस्कारसम्पन्ना स्तन्व दौदन्वती रपः।
एतत् त्रयीमयं ज्योति रादित्याख्यं निमज्जति ॥ ११ ॥

त दह मिमां पुण्यसलिलां नदीं गत्वा, अघमर्षणस्नानं कृत्वा, भगवतः सवितु रर्घ्यं दत्वा, सर्वेश्वरं वासुदेवं ध्यात्वा, प्रतिश्रुतसमय-पूर्वकं राक्षसस्य समीप मुपगच्छामि। (इति समित्पाणि र्निष्क्रान्तः)

(ततः प्रविशति विषीदन् केशवदासः)

केशवदासः—(सास्रम) हा पुत्र सुगत!

आत्मीयः पर इत्ययं खलु कृतः सत्यं! कृपायां क्रमः,
किं रक्ष्या बहवः कि मेक इति ते जाता न चिन्ता कथम्?।
अस्मान् त्रातु महो! स्वजीवितपरित्यागं त्वया कुर्वता
येनाऽऽत्मा, पितरौ, वधू रिति, हतं निःशेष मेतत् कुलम्॥१२

कष्टं भोः कष्टम्!

ध्रुवं ध्वंसो भावी जलनिधिमहीशैलसरितां,
अतो मृत्योः शीर्यत्कणलघुषु का जन्तुषु कथा?।
तथाऽप्युच्चैः पुत्रव्यसनजनितः कोऽपि विषमो
विवेकभ्रान्माथी दहति हृदयं शोकदहनः॥ १३ ॥

हा! कथं विलय मेव संप्राप्तो वत्सः? (रुदन्) हा महासत्त्व! हा परमकारुणिक! हा विपद्वारिनिधिपतितजनोद्धरणपोत! हा परोपकारतृणीकृतदत्तदेह! क नु खलु गतोऽसि? हा पुत्रशिखामणे,

मन्दभाग्य ममुं जनं विहाय कुत्र प्रस्थितोऽसि? हा जात, देहि मे दर्शनम्! ब्रूहि मे प्रतिवचनम्!! (सर्वतो विलोक्य सोन्मादम्) हन्त! शून्यः संसारः! शून्या दिशः!! शून्यं च निखिलं मही-मण्डलम्!!!

हा हा! किं नु करोमि? क नु शरणं यामि? व्रजामि क वा?
कं पश्यामि? क मालपामि! कतमं पृच्छामि? यच्छामि किम्!।
गत्वा कुत्र, क मत्र वा प्रतिदिनं नत्वा, विदित्वा ऽथ किं,
कृत्वा किं च, पुन र्मम प्रियतमं द्रक्ष्यामि हा! पुत्रकम्॥१४

अहो! अस्त मुपगतं चेदानीं माठरसगोत्रस्य केशवदासस्य जीवितप्रयोजनम्! (निःश्वस्य) हा कथं लोकान्तरं पर्यवसित एव मे प्रियतनूजः! त न्नाऽहं एवंविधः क्षण मपि जीव न्नुपहास्य मात्मानं करोमि। (आत्मान मुद्दिश्य) हा दुरात्मन् केशवदासहतक! कथ मद्याऽपि न म्रियसे? किं मात्मघातिनो लोका दात्मानं परित्रातु मिच्छसि? धिङ् मूर्ख!

वर मद्यैव निर्मज्ज न्नन्धे तमसि दारुणे।
पुत्राननेन्दुरहिता न पुन र्वीक्षिता दिशः॥ १५॥

अपि च,

अन्धं तमः - क्रकच - भैरव - पूयवीची -
चण्डासिपत्रवन - रौरव - शाल्मलीषु।
नैतेषु सन्ति नरकेष्वपि यातना स्ताः
दुःखेन या स्तनयविक्लवजेन तुल्याः॥ १६॥

तदलं विलम्बेन! भवतु, अत्रैव पुण्यनदीतटोपान्ते सुतशोकाग्नि दह्यमान मात्मानं निर्वापयामि । (मन्दं परिक्रम्य, सशोकावेगम्) हा वत्स मध्यम! हा माठरकुलबालप्रवाळ! हा कुपितराक्षस-दक्षिणानृण्यप्रधानपण्य!

नेष्टं, न दत्तं, न कुलोचितानि
सुखा न्यवाप्तानि, यशो न कीर्णम् ।
न्यग्रोधबीजाङ्कुर मूषरस्थं
विडम्बयन् वत्स! दिवं गतोऽसि ॥ १७ ॥

अहो! अविलम्बितं प्राणाः प्रयात! प्रयात!!

अतः परं यद् व्यसनं नून मभ्युदयो हि सः ।
पापस्या ऽभ्युदयद्वार मिदानीं मरणं हि मे ॥ १८ ॥

(इति विलपन् मूर्च्छितो भूमौ निपतति)

(ततः प्रविशति सत्वरो घटोत्कचः)

घटोत्कचः—चिरायते खलु ब्राह्मणवटुः! अतिक्रामति मातु राहारकालः! कि नु खलु करिष्ये? (पश्चाद् दृष्टिं प्रसार्य) अहो अस्तमितप्रायः सूर्यः!

अय मसौ गगनाङ्गणदीपक
स्तरळकालभुजङ्गशिखामणिः ।
क्षणविडम्बितबाडबविग्रहः
पतति वारिनिधौ विधुरो रविः ॥ १९ ॥

(सखेदसम्भ्रमं परिक्रम्य, अग्रतो विलोक्य) कोऽयं भूमौ निरुत्साह-निःसहं विपर्यस्तो दृश्यते। किं मसौ ब्राह्मणकुमारः? (उपसृत्य निर्वर्ण्य) भवतु दृष्टम्! न खलु स ब्राह्मणकुमारोऽयम्, नूनं तस्यैव पिता ब्राह्मणजरठो ऽयम्। आर्य! समाश्वसिहि! समाश्वसिहि!!

केशव—(निमीलितचक्षुरेव) हा वत्स! कथं मां परित्यज्य गतोऽसि?

घटो—आर्य! न खलु तव पुत्रोऽहम्! तस्यैव प्राणापहारको राक्षसोऽहम्!

केशव—(चक्षुरुन्मील्य) हा कथं स एव पापराक्षसः! कष्टं वञ्चितो ऽस्मि स्वरयोगेन।

घटो—भो ब्राह्मण! अतिक्रामति मातु राहारकालः, आहूयतां तव पुत्रः।

केशव—(आत्मानं प्रति) आः केशवदासहतक! कथं गर्भस्थ एव न विपन्नो ऽसि, येनैवं क्षणे क्षणे मरणातिगं दुःख मनुभवसि! (घटोत्कचं प्रति) अतिराक्षसं खलु ते वचनम्!

घटो—कथं रुष्यति ब्राह्मणः? मर्षयतु! मर्षयतु भवान्! अयं मे प्रकृतिदोषः। अथ किन्नामा तव पुत्रः?

केशव—तपस्वी मध्यमः! (इति वक्तु मक्षम एव पुन र्मूर्च्छति)

घटो—मध्यम इति सदृश मस्य! अह मेव आह्वयामि। (नदीतीर मुपगम्य) भो भो मध्यम! मध्यम! शीघ्र मागच्छ।

(ततः प्रविशति पाण्डवमध्यमो भीमसेनः)

भीमसेनः—(श्रुतिमभिनीय) भोः कस्या ऽयं स्वरः?

खगशतविरुते विरौति तारं
द्रुमगहने दृढसङ्कटे वने ऽस्मिन् ।
जनयति च मनोज्वरं स्वरो ऽयं
बहुसदृशो हि धनञ्जयस्वरस्य ॥ २० ॥

घटो—(सचिन्तम्) अहो! चिरायते खलु ब्राह्मणवटुः! अस्तमितोऽयं रविः! अतिक्रामति च मे मातु राहारकालः! तत् किं नु खल्वद्य करिष्ये? भवतु, उच्चैः शब्दापयामि। भो मध्यम! मध्यम!! कुत्र गतो ऽसि? शीघ्रं मागच्छ!

भीम—(आत्मगतम्) भोः! को नु खल्वेतस्मिन् वनान्तरे सायन्तनवेळाया मस्यां मम व्यायामविघ्नमुत्पाद्य, 'मध्यम! मध्यम!!' इति मां उच्चैः शब्दापयति? (परिक्रम्य, घटोत्कचमवलोक्य) अहो दर्शनीयो ऽयं पुरुषः! अयं हि,

सिंहास्यः सिंहदंष्ट्रो मधुनिभनयनः स्निग्धगम्भीरकण्ठो
बभ्रूभूः श्येननासो द्विरदपतिहनु र्दीर्घविश्लिष्टकेशः ।
व्यूढोरा वज्रमध्यो गजवृषभगति र्लम्बपीनांसबाहुः
सुव्यक्तं राक्षसीजो विपुलबलयुतो लोकवीरस्य पुत्रः॥२१

घटो— (कालात्यय मसहमानः) अहह! अतिचिरायते खलु ब्राह्मणवटुः। अतिक्रामति खलु तत्रभवत्या मातु र्मे नितरां

आहारकालः! हन्त कुत्र वा गतोऽयं भवेत्? किं मह मिदानीं करिष्ये। भो भो मध्यम! सत्वर मागच्छ! आगच्छ!

भीम— (उपसृत्य आत्मगतम्) अहो! किं मयं राक्षस-पोतकः, एकपद एव मे आनन्द मुत्पादयति, उपस्नेहयति च कुतो ऽपि निमित्ता दन्तरात्मानम्? अथवा स्नेह श्च निमित्त-सव्यपेक्ष इति विप्रतिषिद्ध मेतत्!

व्यतिषजति पदार्था नान्तरः कोऽपि हेतुः,
न खलु वहिरुपाधीन् प्रीतयः संश्रयन्ते।
विकसति हि पतङ्गस्योदये पुण्डरीकं,
द्रवति च हिमरश्मा वुद्गते चन्द्रकान्तः॥ २२॥

(उपसृत्य प्रकाशम्) भोः प्राप्तो ऽस्मि! किमर्थ मेव मुच्चै राह्वानं कुरुषे?

घटो—(परिवृत्य सहसा निर्वर्ण्य, आत्मगतम्) अहो पुण्या-नुभावदर्शनोऽयं महापुरुषः!

आश्वासस्नेहभक्तीना मेक मालम्बनं महत्।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्तिमत्तरः॥ २३॥

(भीमसेनं चिरं निर्वर्ण्य, आत्मगतम्) न खल्वयं ब्राह्मणवटुः! (सानुरागम्) अहो दर्शनीयोऽयं महाशयः! य एषः,

सिंहाकृतिः, कनकतालसमानबाहुः,
मध्ये तनुः, गरुडपक्षविलिप्तपक्षः ।
विष्णु र्भवे द्विकसिताम्बुजपत्रनेत्रो
नेत्रे ममा ऽऽहरति बन्धु रिवा ऽऽगतो ऽयम् ॥२४

(अन्यतः परिवृत्य, प्रकाशम्) भो मध्यम! त्वां खल्वहं शब्दापयामि ।

भीम—(पुरतो गत्वा) अत एव खल्वहं प्राप्तवा नस्मि!

घटो— (अन्यतः परिवृत्य प्रकाशम्) भो मध्यम! मध्यम! त्वां खल्वहं शब्दापयामि ।

भीम—(अग्रतो गत्वा) भोः पुरुष! अतः खल्वहं प्राप्तः ।

घटो—(भीमसेनं प्रति सविस्मम्) किं भवा नपि मध्यमः?

भीम—(साभिमानम्) न तावत् कश्चि दपरः!

मध्यमोऽह मवध्यानां, उत्सिक्तानां च मध्यमः ।
मध्यमोऽहं क्षिते र्भद्र! भ्रातृणा मपि मध्यमः ॥ २५ ॥

घटो–भवितव्यम्!

भीम–अपि च,

मध्यमः पञ्च भूतानां, पार्थिवानां च मध्यमः ।
भवे च मध्यमे लोके, सर्वकार्येषु मध्यमः ॥ २६ ॥

केशव—(श्रुत्वा समाश्वस्य) अये!

मध्यम स्त्विति संप्रोक्त, नूनं पाण्डवमध्यमः ।
अस्मान् मोक्तु मिहाऽऽयातो दर्पा न्मृत्यो रिवोत्थितः ॥

(नेपथ्ये गीतिः)

भज गोविन्दं! भज गोविन्दं!
भज गोविन्दं! मूढमते ।
भज गोविन्दं! परमानन्दं
भावय नाऽन्यं शरणं ते ॥

भीम—(श्रुति मभिनीय सानन्दम्) अहो कस्याऽयं पुनः प्रशान्तगम्भीरमधुरो निनादः ?

अथ कोऽय मीड्यचरितो महाशयो
ध्वनिनैव दत्तपुलकं करोति माम् ? ।
नवनीलनीरधरधीरगर्जित-
क्षणबद्धकुड्मलकदम्बडम्बरम् ॥ २८ ॥

केशव—(उपविश्य सहर्षम्) हन्त भोः! किमेतत्? ननु पुत्रस्येव मे मधुरगम्भीरो ध्वनिः श्रूयते! (इति सकौतुक मवलोकते)

(ततः प्रविशति पुन रपि मध्यमः)

मध्यमः—(सभक्त्यतिशयं गायन्)

नलिनीदळगतजलमतितरलं
तद्व ज्जीवित मतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं
लोकं शोकहतं च समस्तम् ॥ भज ॥

का ते कान्ता? क स्ते पुत्रः
संसारोऽय मतीव विचित्रः ।
कस्य त्वं? कः? कुत आयातः?
तत्त्वं चिन्तय य दिदं भ्रातः ॥ भज ॥

मा कुरु धनजनयौवनगर्वं,
हरति निमेषात् कालः सर्वम् ।
मायामय मिद मखिलं हित्वा
ब्रह्मपदं त्वं प्रविश विदित्वा ॥ भज ॥

दिनयामिन्यौ सायं प्रातः
शिशिरवसन्तौ पुन रायातः ।
कालः क्रीडति गच्छत्यायुः
तदपि न मुञ्चत्याशावायुः ॥ भज ॥

पुन रपि जननं, पुन रपि मरणं,
पुन रपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे
कृपया ऽपारे पाहि! मुरारे ॥ भज ॥

येषां श्रीमद्यशोदाद्युतपदकमले
नास्ति भक्ति र्नराणां,
येषा माभीरकन्याप्रियगुणकथने
नाऽनुरक्ता रसज्ञा ।

येषां श्रीकृष्णलीलाललितगुणरसे
सादरौ नैव कर्णौ,
धिक्तान्! धिक्तान्!! धिगेतान्!!! कथयति सततं
कीर्तनस्थो मृदङ्गः ॥ २९ ॥

भीम—(सानन्दपरवशं शृण्वन्) सत्यं साधो सत्यम्!

वेदस्या ऽध्ययनं कृतं, परिचितं शास्त्रं, पुराणं स्मृतं,
सर्वं व्यर्थमिदं, पदं न कमलाकान्तस्य चेत् कीर्तितम्।
उत्खातं, सदृशीकृतं, विरचितः सेको ऽम्भसा भूयसा,
सर्वं निष्फल मालवालवलये क्षिप्तं न बीजं यदि ॥ ३०

केशव— (दृष्ट्वा सहर्षमुत्तिष्ठन्) अहो मे पुत्रको ऽयं! दिष्ट्या! अक्षत शरीरो वर्तते!

उभौ मध्यमौ—(अन्योन्यं प्रति सस्नेहानुरागं निर्वर्ण्य)

यदृच्छासंपातः किमु खलु गुणानां मतिशयः
पुराणो वा जन्मान्तरनिबिडबन्धः परिचयः।
निजो वा सम्बन्धः किमु विधिवशात् को ऽप्यविदितः
ममैं तस्मिन् दृष्टे हृदय मवधानं रचयति ॥ ३१ ॥

केशव– (चिरं निर्वर्ण्य, पुत्रस्याऽङ्गानि स्पृशन्) हा पुत्रक! कथ मेत त्ते सुकुमारं शरीरं निर्घृणहृदया राक्षसी आहारयिष्यति? (इति पुत्रं कण्ठे गृहीत्वा तारं रोदिति)

मध्यमः — (दृष्ट्वा, सविस्मयसंभ्रमम्) हा! कथं तातः? तात! अलं परिदेवितेन?

क्रोडीकरोति प्रथमं यदा जात मनित्यता।
मातेव जननी पश्चात्, तदा शोकस्य कः क्रमः॥ ३२॥

(इति राक्षससमीपं गन्तु मिच्छति)

केशव—(पुत्रं चिबुके गृहीत्वा) हा तनय मध्यम! कथं व्यापाद्यमान एव मया त्वं प्रेक्षितव्यः? (इति मोह मुपगच्छति)

भीमः—(सकरुणं श्रुत्वा) अये भयार्तानां ब्राह्मणानामिवा ऽऽर्तालापः? हन्त! तपोवन मिदम्! क्व पुन रत्र ईदृशाना मविनयानां सम्भवः? त द्याव दुपसृत्य—का वेतौ? कुतो वैतयोर्भयम्?—इति स्फुटीकरोमि। (इति तयोः समीप मुपसर्पति)

मध्यमः—(घटोत्कच मुपसृत्य) भोः पुरुष! नन्वहं यथा समयं प्राप्तो ऽस्मि!

आचम्यास्यां तरङ्गिण्यां परलोकेषु दुर्लभम्।
आत्मनैवा ऽऽत्मनो दत्तं पद्मपत्रोज्वलं जलम्॥ ३३॥

घटो—(दृष्ट्वा, सहर्षम्) हन्त! प्राप्तवा निदानीं खल्वसि! मध्यम, मध्यम, इत इतः!

केशव—(भीमसेन मुपगम्य) भो महापुरुष! परित्रायस्व ब्राह्मणकुलम्! अनपराधिनं, अनाथं, अशरणं च मत्पुत्रं मध्यम मिमं अकारणा द्धन्तु मिच्छति पापराक्षसोऽयम्।

भीम—(सावष्टम्भम्) अभय मभयं भयार्तानाम्! आः!

कः पाण्डवे वन मिदं
शासति शासितरि दुर्विनीतानाम् ।
अय माचरत्यविनयं
विप्रेषु सत्स्ववध्येषु ? ॥ ३४ ॥

(उपसृत्य) भो भो ब्राह्मणोत्तम! न भेतव्यम्! न भेतव्यम्!! पाण्डवमध्यमो ऽह मभिवादये ।

केशव—(हस्त मुद्यम्य) वायुरिव दीर्घायु र्भव!

भीम—अनुगृहीतो ऽस्मि! कुतो भय मार्यस्य?

केशव—भो महात्मन्! श्रूयताम्! अहं खलु कुरुराजेन युधिष्ठिरेण अधिष्ठितपूर्वे कुरुजाङ्गले यूपग्रामवास्तव्यो माठर-सगोत्र श्च, कल्पशाखाध्वर्युः, केशवदासो नाम ब्राह्मणः । तस्य मम, उत्तरस्यां दिशि, उद्यामग्रामवासी मातुलः कौशिकसगोत्रो यज्ञ-बन्धु र्नाम अस्ति । तस्य पुत्रोपनयनानुभवार्थं सकलत्रो ऽस्मि प्रस्थितः ।

भीम—अरिष्टो ऽस्तु पन्थाः! तत स्ततः?

केशव—(घटोत्कचं दर्शयन्) ततो मा मेष हि,

स जलजलदगात्रः पद्मपत्रायताक्षो
मृगपतिगतिलीलो राक्षसः प्रोग्रदंष्ट्रः ।
जगति विगतशङ्क स्त्वद्विधानां समक्षं
ससुतपरिजनं भो! हन्तुकामो ऽभ्युपैति ॥ ३५ ॥

भीम—(आत्मगतम्) अहो कष्टम्!

कुलस्य व्यापत्या सपदि शतधोदीपिततनुः
मुहु र्बाष्पं श्वासा न्मलिन मपि रागं प्रकटयन्।
श्लथै रङ्गैः शून्यै रसकृ दुपरुद्धै श्च करणै
र्युतो धत्ते ग्लानिं करुण इव मूर्तो द्विजवरः ॥३६॥

एव मनेन ब्राह्मणजनस्य मार्गविघ्नः कृतः। भवतु, निग्रहीष्यामि ताव देनम्। (उपसृत्य प्रकाशम्) भोः पुरुष, तिष्ठ! तिष्ठ!!

घटो—(सगर्वं परिवृत्य, भीमसेन मुग्रेण चक्षुषा पश्यन्) एष स्थितो ऽस्मि!

भीम—(आत्मगतम्) हन्त! को ऽप्यस्मिन् राक्षसपोतके पौरुषातिरेकः!

दृष्टि स्तृणीकृतजगत्त्रयसत्त्वसारा,
धीरोद्धता नमयतीव गति र्धरित्रीम्।
कौमारके ऽपि गिरिव द्गुरुतां दधानो
वीरो रसः कि मय मेत्युत दर्प एव ॥ ३७ ॥

(प्रकाशं, घटोत्कच मुद्दिश्य) अयि भो महावीर! किमर्थं ब्राह्मणं परास्यसि?

पुत्रनक्षत्रकीर्णस्य पत्नीकान्तप्रभस्य च।
वृद्धस्य विप्रचन्द्रस्य भवान् राहुरिवा ऽऽगतः ॥ ३८ ॥

घटो—अथ किम्? राहु रेव !

भीम—आः!

निवृत्तव्यवहारो ऽयं सदार स्तनयैः सह ।
सर्वापराधे ऽवध्यत्वात् मुच्यतां द्विजसत्तमः ॥ ३९ ॥

घटो—न मुच्यते । (इति विकटं परिक्रामति)

भीम—(आत्मगतम्) भोः! कस्य पुत्रेणा ऽनेन भवितव्यम्?

भ्रातृणां मम सर्वेषां कोऽयं भो गुणतस्करः ।
दृष्ट्वैतद् बालशौण्डीर्यं सौभद्रस्य स्मराम्यहम् ॥ ४० ॥

(प्रकाशम्) भोः पुरुष ! मुच्यताम् ।

घटो—(सदर्पम्) न मुच्यते !

मुच्यता मिति विस्रब्धं ब्रवीति यदि मे पिता ।
न मुच्यते, तथा ह्येष गृहीतो मातु राज्ञया ॥ ४१ ॥

(इति ब्राह्मणकुमारं बला दाकर्षति)

भीम—(सविस्मयं, आत्मगतम्) कथं मातु राज्ञेति? अहो गुरुशुश्रूषुः खल्वयं तपस्वी !

माता किल मनुष्याणां दैवताना श्च दैवतम् ।
मातु राज्ञां पुरस्कृत्य वय मेतां दशां गताः ॥ ४२ ॥

(घटोत्कच मुपसृत्य जनान्तिकम्) भोः पुरुष, प्रष्टव्यं खलु ताव दस्ति?

घटो—(जनान्तिकम्) ब्रूहि! ब्रूहि शीघ्रम्!

भीम—(जनान्तिकम्) अयि भो वीरसत्तम! का नाम भवतो माता?

घटो—(जनान्तिकम्) हिडिम्बा नाम राक्षसी!

कौरव्यकुलदीपेन पाण्डवेन महात्मना।
सनाथा या महाभागा पूर्णेन द्यौ रिवा ऽऽत्मना ॥ ४३ ॥

भीम—(सहर्षं आत्मगतम्) एवं हिडिम्बायाः पुत्रो ऽयम्? सदृशो ह्यस्य गर्वः!

रूपं सत्त्वं बलं चैव पितृभिः सदृशं बहु।
प्रजासु वीतकारुण्यं मन श्चैवा ऽस्य कीदृशम्? ॥ ४४ ॥

(प्रकाशम्) भोः पुरुषसिंह! मुच्यताम्, मुच्यता मयं ब्राह्मण-कुमारः।

घटो— (सोद्धतम् परिक्रामन्) न मुच्यते! सर्वथैव न मुच्यते!! (इति ब्राह्मणपुत्रं पुन र्बलात्कारेण गृह्णाति)

भीम—रे रे अविनीत!

प्रणयसतीसलीलपरिहासरसाधिगतै
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत्।
वपुषि वधाय तत्र तव हस्त मुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥ ४५ ॥

(इति मध्यमं घटोत्कचहस्ताद्विमोच्य, केशवदासं प्रति) भो ब्राह्मणोत्तम! एष गृह्यतां तव पुत्रः। वय मेन मनुगमिष्यामः।

मध्यमः— मा! मा भवा नेवम्!

त्यक्ताः प्रागेव मे प्राणा गुरुप्राणेष्वपेक्षया।
युवा क्षत्रगुणोपेतो भवान् तिष्ठतु भूतले ॥ ४६ ॥

भीम—(मध्यमं प्रति) आर्य! मा! मैवम्!! क्षत्रियकुलोत्पन्नोऽहम्। पूज्यतमः खलु ब्राह्मणः!

आज्ञा, कीर्तिः, पालनं ब्राह्मणानां,
दानं, भोगो, मित्रसंरक्षणं च।
येषा मेते षड्गुणा न प्रवृत्ताः,
को ऽर्थ स्तेषां क्षत्रियोपाश्रयेण ॥ ४७ ॥

तस्मात्, मच्छरीरेण, ब्राह्मणशरीरं विनिमातु मिच्छामि।

मध्यमः—भो महात्मन्! दर्शिता त्वयेयं आत्मप्राणप्रदानव्यवसायनिर्व्याजा मयि दयालुता। त दल मनेन निर्बन्धेन! पश्य!

जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।
परार्थं बद्धकक्षाणां त्वादृशा मुद्भवः कुतः ॥ ४८ ॥

तत् प्रसीद! मुच्यता मय मध्यवसायः।

भीम—(सश्लाघम्, मध्यमं करे धृत्वा) अहो जगद्विपरीतं तवेदं ब्राह्मणस्य चेतः! भो महासत्त्व! न मे चिरा लब्धावकाशस्य परार्थसम्पादनामनोरथस्या ऽन्तरायं कर्तु मर्हसि।

मध्यमः—भो भो साहसिकाग्रणीः! किं वृथा प्रयासेन? न खलु मध्यमो माठरकुलं मलिनीकरिष्यति!

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः।
शरीरकस्याऽपि कृते मूढाः पापानि कुर्वते ॥ ४९ ॥

अथ, अनुकम्पनीयश्चेदहं, तदिमौ मद्विपत्तिविक्लवौ दुर्भाग्यस्य मे वृद्धौ मातापितरौ, प्रियौ भ्रातरौ च यथा न परित्यजेयु र्जीवितं, तथाऽभ्युपायश्चिन्त्यताम्।

भीम—(आत्मगतम्)

आर्तं कण्ठगतप्राणं परित्यक्तं स्वबान्धवैः।
त्रायेनैनं यदि ततः कः शरीरेण मे गुणः ॥ ५० ॥

(प्रकाशम्) अयि भोः श्रोत्रियप्रवर! दुष्टनिग्रहः शिष्टपरिपालनं च खलु क्षत्रियस्य मुख्यो धर्मः!

क्षतात् किल त्रायत इत्युदग्रः
क्षत्त्रस्य शब्दो भुवनेषु रूढः।
राज्येन किं तद्विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्वा ॥ ५१ ॥

घटो—(आत्मगतम्) एवं क्षत्त्रियोऽयं वीरपुरुषः! तेन हि गर्वः! भवतु, इममेव क्षत्त्रियप्रवरं हत्वा नेष्यामि। (मध्यमं मुद्दिश्य भीमसेनं प्रति प्रकाशम्) अथ केनाऽयं वारितो ब्राह्मणबटुः?

भीम—मया ।

घटो—किं त्वया?

भीम—अथ किम्!

घटो—तेन हि, भवा नेव शीघ्र मागच्छतु ।

भीम—(ईषद् हसन्) एव मतिवीर्यबलं न शक्नोम्यनुगन्तुम् । यदि ते शक्ति रस्ति, बलात्कारेण मां नय ।

घटो—(सगर्वोद्रेकम्) नन्वहं हैडिम्बो घटोत्कचः!

भीम—(प्रहसन्)

कामं घटो वा, ऽथ भवोत्कचो वा !
हैडिम्ब एवा ऽप्यथवा हिडिम्बः ।
न कोऽपि मां धर्षयितुं समर्थ
इहा ऽस्ति लोके पुरुषप्रवीरः ॥ ५२ ॥

घटो—(समदम्) कं मां प्रतिजानीते भवान्? (इत्युदग्रदृष्ट्या भीमसेनं पश्यति)

भीम—(सोल्लुण्ठनं सस्मितं, साकूतं च) किं मन्यत्? नूनं! मत्पुत्र इति जाने ।

घटो—(सक्रोधम्) कथं कथम्? अहो दौरात्म्य मस्य क्षत्रियपशोः!

भीम—(अनुनयं नाटयन्) कथं रुष्यति महावीरः? मर्षयतु! मर्षयतु भवान्! सर्वाः प्रजाः क्षत्रियाणां पुत्रशब्देन अभिधीयन्ते । अत एव मया 'पुत्र' इति भवा नभिहितः ।

घटो—(सस्मितम्) अहो! भीताना मायुधं गृहीतं भवता ?

भीम—अयि भोः !

शपामि! सत्येन, भयं न जाने,
ज्ञातुं त दिच्छामि भवत्समीपे ।
किंरूप मेतद् वद, भद्र! तस्य
गुणागुणज्ञः सदृशं प्रपद्ये ॥ ५३ ॥

घटो—अयि भो वृथाभिमानिन्! एष ते क्षणेन भय मुपदिशामि । गृह्यता मायुधम् ।

भीम—आयुध मिति? भो महासत्त्व! गृहीत मेतत्। (इति दक्षिणबाहुं प्रसारयति)

घटो—(साधिक्षेपम्) हा ! कथ मिव ?

भीम—(तूष्णीं स्मितं कृत्वा) अयि भोः!

कांश्चनस्तम्भसदृशो रिपूणां निग्रहे रतः ।
अयं तु दक्षिणो बाहु रायुधं सदृशं मम ॥ ५४ ॥

घटो—(सामर्षम्) इद मुपपन्नं पितु र्मे जगदेकवीरस्य ।

भीम—(सकौतुक मिव) अथ, को ऽयं जगदेकवीरः?

विश्वकर्ता, शिवः, कृष्णः, शक्रः, शक्तिधरो, यमः ।
एतेषु कथ्यतां, भद्र! केन ते सदृशः पिता ॥ ५५ ॥

घटो—(साभिमानम्) सर्वै रपि!

भीम—धिक्! अनृत मेतत्!

घटो—(सरोषावेशम्) कथम्? कथम्? अनृत मित्याह जाल्मः! अरे रे! दुरात्मन्! कथं जगदेकवीरं अधिक्षिपसि मे गुरुम्? भवतु! इत स्त्वां निर्दयं मन्मातु राहारार्थं बलात्कारेण नेष्यामि। (इति सर्वजवेन गत्वा भीमसेनस्य प्रसारितं हस्तं बला दाकर्षति)

भीम—(न किञ्चिदपि चलन्) सर्वबलेना ऽप्याकर्षतु भवान्! आकर्षतु! (इति विहसति)

घटो—(ससम्भ्रमम्) कथं अचल इवा ऽयं न किञ्चि दपि चाल्यते! भवतु, इमं स्थूलं वृक्ष मुत्पाट्य प्रहरामि तावत्। (तथैव तत्र स्थितं स्थूलवृक्ष मेक मुत्पाट्य प्रहरति, वृक्षश्च भीमसेनस्य गात्रे पतितः शतधा भग्नो भवति)

भीम—अहो! अतीव बलवान् वृक्षः! (इति प्रहसितं करोति)

घटो—(सविस्मयम्) कथ मनेना ऽपि स्थूलवृक्षेण न शक्यते हन्तुम्! कि न्नु खलु करिष्ये? (अग्रतो विलोक्य) भवतु, दृष्टम्! एतद् गिरिकूट मुत्पाट्य प्रहरामि!

शैलकूटं मया क्षिप्तं प्राणा नादाय यास्यति।

(इति शैलकूट मुत्पाट्य भीमसेनस्य वक्षसि प्रक्षिपति, तच्च क्षणा च्चूर्ण कीर्ण भवति)

भीम—(साकूतं विहस्य)

रुष्टो ऽपि कुञ्जरो वन्यो न व्याघ्रं धर्षये द्वने॥ ५९॥

घटो— (साश्चर्यसम्भ्रमम्) हा! कथ मयं, अनेना ऽपि, न शक्यते हन्तुम्! किं नु खल्वद्य करिष्यामि? (सचिन्तम्) भवतु, दृष्टम्! (जनान्तिकं भीमसेनं प्रति)

नन्वहं भीमसेनस्य पुत्रः! पौत्रो नभस्वतः।
तिष्ठेदानीं सुसन्नद्धो, नियुद्धे नास्ति मत्समः॥ ५६॥

भीम—बाढं! प्रथमः कल्पः! (इत्युभौ नियुद्धं कुरुतः)

केशव—(साश्चर्यं पश्यन्) हन्त! जितो राक्षसः!

मध्यमः—न खलु! न खलु!! हा! जितो महापुरुष एव! (इति सकरुणं पश्यति)

घटो—(भीमसेनं भुजाभ्यां बध्वा) अरे रे वृथानियुद्धाभिमानिन्!

व्रजसि कथ मिह त्वं वीर्य मुल्लङ्घ्य गाढो
र्गज इव दृढपाशैः पीडितो मद्भुजाभ्याम्।

भीम— (आत्मगतम्) कथं गृहीतो ऽस्म्यनेन वत्सेन! (सहर्षविमर्शम्) भोः सुयोधन! वर्धते खलु तव शत्रुपक्षः! तत्, कृतरक्षो भव! (प्रकाशम्) भोः पुरुष! अवहितो भव!

व्यपनय बलदर्पं, दृष्टसारो ऽसि वीर!
न हि मम परिखेदो विद्यते बाहुयुद्धे॥ ५७॥

घटो— (सगर्वोद्रेकं) नन्वहं अवहित एवा ऽस्मि! (उच्चैः गायन्)

कुरु! कुरु विक्रमं! अयि यदि शक्तिः ।
पुरुष! न ते पुन रस्ति हि मुक्तिः ॥ कुरु ॥

भीम—(भुजबन्धं प्रचाल्य)

सपदि विगळितं, तव बन्धन मिदम् ।
अपसर! सन्त्यज! निजभुजबलमदम् ॥ सपदि ॥

घटो—(सोत्प्रासम्)

पालयसि गुरु - यौवन मद्य ।
पालय गुरुतर! निजगिर मद्य ॥ कुरु ॥

भीम—(साट्टहासम्)

भव समवहितः! कुरु सदुपायम् ।
पवनबल स्त्विह हन्ति तवा ऽयम् ॥ सपदि ॥

केशव—(सानन्दं पश्यन् स्वगतम्) साधु भो बाहुशालिन् भीमसेन! साधु!

मध्यमः—(आत्मगतम्) सुष्ठु शोभसे महासत्व! सुष्ठु शोभसे राक्षसस्य गर्वभङ्गेन! (इति साश्चर्यं पश्यति)

घटो—(सक्रोधविषादम्) हा धिक्! हा धिक्!! कथ मने नाऽप्युपायेनाऽयं पुरुषो न शक्यते हन्तुम्! किं नु खल्विदानीं पुन रभ्युपायं करिष्ये? (सविमर्शम्) हन्त! स्मृतम्! अस्ति मे मातृप्रसादलब्धो मायापाशः। तेन बध्वैनं मातुः समीपं नेष्यामि। (चिन्तां नाटयन्) कुतः खल्वापः? भो गिरे! आप स्तावत्।

(गिरे रम्बुधारा स्रवति) हन्त! स्रवति ! (आचम्य, मन्त्रं जपन्) भोः पुरुष! मा कुरु भुजबलगर्वम्!

मायापाशेन बद्ध स्त्वं विवशो न गमिष्यसि ।
राजसे रज्जुभि र्बद्धो शक्रध्वज इवोत्सवे ॥ ५८ ॥

(इति मायया भीमसेनं बध्नाति)

केशव—(दृष्ट्वा सभयं स्वगतम्) हा कष्टम्! आलेख्ये चित्रित इव मायापाशेन बद्ध स्तूष्णीं तिष्ठति महानुभावो भीमसेनः!

मध्यमः—अहो ! आश्चर्यं खलु मायाविनो राक्षसस्य सामर्थ्यम्!

भीम—(क्षणं स्तब्ध इव स्थित्वा) हन्त! कथं मायापाशेन बद्धोऽस्मि? कि मिदानीं करिष्ये? (ध्यान मभिनीय) अहो! अस्ति मे महेश्वरप्रसादलब्धो मायापाशमोक्षणमन्त्रः । तं जप्त्वा मोचयामि तावदात्मानम् । हन्त! कुतः खल्वापः? भो ब्राह्मण कुमार, अस्याः पुण्यनद्याः सकाशात् कमलपत्रोदरे किञ्चित् समानय शीघ्रं शुद्धोदकम् ।

मध्यमः—तथैव! (इति नदीं प्रति सत्वरं धावति)

केशव— (झटित्युपसृत्य) इमाः कमण्डलुगता आपः! (इति भीमसेनस्य हस्तं कमण्डलुमुखा दपः सिञ्चति)

भीम— अनुगृहीतोऽस्मि! (इति कथञ्चि दाचम्य, मन्त्रं जप्त्वा, मायां मोचयति)

घटो— (सशोकसंभ्रमम् आत्मगतम्) अये! पतितोऽयं मायापाशः! किं मह मिदानीं मन्दभाग्यः करिष्ये? हा धिक् कष्टम्! सर्वथा, अनेन मानुषेण जितो ऽस्मि! हा तात भीमसेन! कथं न पश्यसि पुत्रस्याऽवस्था मिमाम्।

केशव—(सहर्षम्) हन्त! कृतार्थाः स्मः! दिष्ट्या निर्जितः खलु पापराक्षसो ऽनेन परार्थैकजीवनेन महासत्त्वेन!

घटो—(विचिन्त्य, कथंचि दात्मानं संस्तभ्य) भवतु! भो महापुरुष, जितो ऽस्मि ताव दहं भवता! तथाऽपि, पूर्वसमयं स्मृत्वा मन्मातुः समीप मागच्छतु भवान्!

भीम—कथं "समय" इति? एष स्मरामि! भोः कुमार, गच्छा ऽग्रतः।

(उभौ परिक्रामतः)

भीम—(दक्षिणाक्षिस्पन्दनं सूचयित्वा, विमृश्य, स्वगतम्) अहो!

दक्षिणं स्पन्दते चक्षुः फलाकाङ्क्षा न मे क्वचित्।
न च मिथ्या मुनिवचः कथयिष्यति किं न्विदम् ॥५९॥

(इति चिन्तयन्नेव विनीतेन घटोत्कचेन समुपदिष्टमार्गो निष्क्रान्तः)

केशव—भोः पुत्रक! सत्वरं एह्येहि, अयं गच्छत्येव वृकोदरः!

आक्रम्य राक्षस मिमं ज्वलदुग्ररूपं
उग्रेण बाहुबलवीर्यगुणेन युक्तम् ।
एष प्रयाति शनकै रवधूय शीघ्रं
आसारवर्ष मिव गोवृषभः सलीलः ॥ ६० ॥

तद् वय मपि तावत् त्वद्विरहसन्तप्तां ब्राह्मणीं, तव प्राणाधिकौ भ्रातरौ च समादाय, त मेव महापुरुष मनुगच्छामः ।

मध्यमः—(सत्वरं प्रतिनिवृत्य) यथा ऽऽदिशति तातः!

(इ युभा वपि निष्क्रान्तौ)

—(०)—

इति

द्वितीयः प्रघट्टकः

समाप्तः



अथ

हैडिम्ब - वैदग्ध्ये

तृतीयः प्रघट्टकः

देशः—तत्रैव हिडिम्बादेव्या वासभवनस्य पुरतः केळिलतागृहम्;

कालः—पूर्वरात्रः

(ततः प्रविशति मन्दयाना - करेणुकाभ्यां सह कदळीगृहे मल्लिकामण्डपे चन्द्रकान्तशिलातलोपविष्टा कामयमाना-वस्था पर्युत्सुका हिडिम्बा देवी)

हिडिम्बा—(विरहव्यथां नाटयन्ती)

आ याता मधुयामिनी, यदि पुन र्नाऽऽयात एव प्रभुः
प्राणा यान्तु विभावसौ! यदि पुन र्जन्मग्रहं प्रार्थ्यते।
व्याधः कोकिलबन्धने, विधुपरिध्वंसे च राहुग्रहः,
कन्दर्पे हरनेत्रदीधिति रहो! प्राणेश्वरे मन्मथः॥ १ ॥

सखि मन्दयाने! अपि सत्यं दृष्ट स्त्वया मत्प्राणेश्वरः? कि मय मस्मिन् वनप्रदेश एव साम्प्रत मेकाकी निवसति?

मन्दयाना—देवि! न केवलं दृष्टो मया तव जीवितेश्वरः, परन्तु सुचिर माभाषित श्च। तपोवनस्या ऽस्य संरक्षणार्थं भर्तारं भीमसेन मेक मेवा ऽत्र नियोज्य, धर्मपुत्रादयः सर्वे ऽपि महर्षे धौम्यस्या ऽऽश्रमं गताः।

हिडि—सखि! किं स्मरति वा मा मार्यपुत्रः?

मन्द—प्रियसखि! कि मत्र बहुनोक्तेन?

पूर्वं यत्र समं त्वया रतिपते रासादिताः सिद्धयः,
तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुन स्ते पतिः।
ध्यायं स्त्वा मनिशं, जपन्नपि तवैवा ऽऽलापमन्त्रावळीः,
भूय स्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति॥

हिडि—तत् कि मद्याऽपि नाऽऽगतो मे प्राणवल्लभः? तत्सङ्गमसुखकाङ्क्षिण्या खलु मया—'मत्प्राणेश्वरबाहुबलपरिपालिते ऽस्मिन् वनान्तरे क मपि महापुरुषलक्षणं, मध्यमे वयसि वर्तमानं, मानुषं परिमृग्य, मदुपवासपारणार्थं मानये'ति छलात् प्रेषितो मे प्रियतनयो घटोत्कचः

करेणुका—हला! समीचीनोऽय मभ्युपायः (साश्चर्यम्) अहो! हिडिम्बादेव्याः प्रणयवैदग्ध्यम्! भर्तुः भीमसेना दन्यः कोवेदानीं तादृशः पुरुषधौरेयो ऽत्र लभ्यते? अनन्यमानुषं खलु तपोवन मिद मिदानीम्!

हिडि—कथं अद्याऽपि चिरायते वत्सो मे घटोत्कचः!
(इत्युत्थाय, द्वारदेशं गत्वा, साभिलाषं दिशो वीक्षते)

करे—(जनान्तिकं मन्दयानां प्रति)

केलीगेहं ललितशयनं, भूषितं चाऽऽत्मदेहं
दर्शं दर्शं, दयितपदवीं सादरं वीक्षमाणा ।
भावक्रीडां मनसि विविधां भविनीं कल्पयन्ती
सारङ्गाक्षी रणरणिकया निःश्वसन्ती समास्ते ॥३॥

(प्रकाशं, हिडिम्बां प्रति) आयि विलासिनि, तव मुख राग एव सूचयति महानुभावे भर्तरि परमानन्दनिर्भर मनुरागातिशयम् । नूनं ते भर्तु रन्यूनपराक्रमः खलु वत्सो घटोत्कचः । त न्निश्चित मेव पवनतनयं भीमसेन मपि बला दय मानेष्यति । सर्वं च वास-भवनं पूर्वमेवाऽ नङ्गशयनोचितं कृतम् ।

मन्द—(सस्नेहं परिष्वज्य) प्रियसखि ! इदानीं नून मनवद्यं खलु ते रूपम् !

वारं वार मुदश्रु लोचनयुगं पर्याकुलं जायते,
निःश्वासा विरमन्ति न क्षण ममी व्याश्लिष्टदन्तच्छदाः ।
श्रुत्वा ऽप्यागमनं खलु प्रियतमस्याऽहो! तवेऽयं स्थितिः,
नो जाने गृह मागते तु दयिते कीदृग्दशा माप्स्यसि ॥४॥

हिडि—सखि मन्दयाने ! अलं परिहासेन ! अपि सत्यं वासभवन मिद मागमिष्य त्यद्य मे प्राणनाथः ?

विदूरे केयूरे कुरु करयुगे रत्नवलयैः,
अलं गुर्वी ग्रीवाभरणलतिकेयं ! किं मनया ? ।
नवा मेका मेकावळि मपि मयि त्वं विरचयेः,
न पथ्यं नैपथ्यं बहुतर मनङ्गोत्सवविधौ ॥ ५ ॥

(इति दर्पणतले मुखबिम्ब मवलोकयन्ती, आत्मान मलङ्करोति)

मन्द—(सानन्दं विलोक्य जनान्तिकम्) हन्त भोः पश्य ! पत्युः समागमकाङ्क्षिणी नः प्रियसखी,

हारं गुम्फति तारकान्तिरुचिरं, ग्रथ्नाति काञ्चीलतां,
दीपं न्यस्यति, किं तु तत्र बहुलं स्नेहं न धत्ते पुनः ।
आलीना मपि वासकस्य रजनौ कामानुरूपां क्रियां
साचिस्मेरमुखी, न वोढसुमुखी, दूरात् समुद्वीक्षते ॥६॥

हिडि— (कालविलम्ब मसहमाना) अहो चिरायते खलु वत्सः ! हन्त ! कथं ना ऽद्या ऽपि समागच्छति मत्प्राणेश्वरः ?

दूरे तिष्ठति सो ऽधुना प्रियतमः, प्राप्तो वसन्तोत्सवः,
कष्टं ! कोकिलकूजितानि सहसा जातानि दम्भोळयः ।
अङ्गा न्यप्यवशानि, यांचितकतां यातीव मे चेतना,
हा कष्टं ! मम दुष्कृतस्य महिमा चन्द्रो ऽपि चण्डायते ॥७॥

(चतुष्पदी गीतिः)

पल्लवी

या म्यहो ! क मिह शरणम् ? सख्यौ,
या म्यहो ! क मिह शरणम् ! ॥

चरणाः

कथितसमये ऽपि पतिः, अहह! न ययौ वनम् ।
मम विफल मिद ममल - रूप मपि यौवनम् ॥ या ॥

यदनुगमनाय निशि गहनमपि शीलितम् ।
तेन सह हृदय मिदं असमशरकीलितम् ॥ या ॥

अहह! कलयामि वल - यादिमणिभूषणम् ।
पतिविरहदहनवह - नेन बहुदूषणम् ॥ या ॥

मम मरण मेव वरं! अतिवितथकेतना ।
कि मिह विषहामि विर - हानल मचेतना ॥ या ॥

(इति मूर्च्छति)

करेणुका—सखि मन्दयाने! अतिगुर्वी खलु देव्या विरहवेदना! समाश्वासय प्रियसखीं नळिनीपत्रोत्थितैः सुशीतलै र्वातैः। अह मपि चन्दनानुलेपनेना ऽनेन निर्वापया म्यस्या हृदय-गतं तापम् । अहो!

किसलयमिव मुग्धं, बन्धना द्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डु क्षाम मस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥ ८ ॥

(इत्युभे यथोक्तं समाश्वासयतः)

हिडि—(किञ्चित् समाश्वस्य) हला!

विरमत! विरमत! सख्यो
नळिनीदळताळवृन्तपवनेन ।
हृदयगतोऽयं वह्नि
र्झटिति कदाचिद् ज्वलत्येव ॥ ९ ॥

अल मल मेतैः शिशिरचन्दनोपचारैः!

अन्तर्गता मदनवह्निशिखावली या,
सा बाध्यते किमिह चन्दनचर्चितेन ? ।
यत् कुम्भकारपचनोपरिपङ्कलेपः,
तापाय केवल मसौ, न तु तापशान्त्यै ॥ १० ॥

आः! कथ मिदानी मार्यपुत्रस्य विरहं सहिष्ये! (सोन्मादं) हला!

पादाघातैः सुरभि रभितः सत्वरं ताडनीयो,
गाढामोदं मलयमरुतः शृङ्खलादाम दत्त ।
कारागारे क्षिपत तरसा पञ्चमं रागराजं,
चन्द्रं चूर्णीकुरुत च शिलापट्टके पिष्टबिम्बम् ॥११॥

(इति सखीभ्या मवलम्बिता पुन र्मूर्च्छति)

मन्द— (सकरुणं पश्यन्ती) हला! किमिदानीं कुर्वः

शय्या पुष्पमयी परागमयता मङ्गार्पणा दश्नुते,
ताम्य न्त्यन्तिकताळवृन्तनळिनीपत्राणि देहोष्मणा ।
न्यस्तं च स्तनमण्डले मलयजं दीर्णान्तरं दृश्यते
कार्था दाशु भवन्ति फेनिलमुखा भूषा मृणाळाङ्कुराः॥१२॥

करे—(सस्नेहं विलोकयन्ती) हा कष्टम्!

नवकिसलयतल्पं कल्पितं तापशान्त्यै
करसरसिजसङ्गात् केवलं म्लापयन्त्याः ।
कुसुमशरकृशानुप्रापिताङ्गारतायाः
शिव! शिव! परितापं को वदेत् कोमलाङ्ग्याः॥१३॥

देवि! समाश्वसिहि! समाश्वसिहि! (इति पुनः समाश्वासयतः)

हिडि—(किञ्चित् समाश्वस्य) सख्यौ, व्यर्थं खल्विदानीं मे यौवनम्! ना ऽद्या ऽपि समायातो मे जीवितेश्वरः!

तत् किं का मपि कामिनी मनुसृतः? किं वा कलाकेळिभि
र्बद्धो बन्धुभिः? अन्धकारिणि वनाभ्यर्णे किमु भ्राम्यति?।
कान्तः क्लान्तमना मनागपि पथि प्रस्थातु मेवा ऽक्षमः!
सन्दिष्टे समये ऽपि यन् मम गृहं वत्सो ऽपि नैवा ऽऽगतः॥१४

(ततः प्रविशति घटोत्कचो भीमसेन श्च)

घटोत्कचः—महापुरुष, इहैव तिष्ठ! भवदागमन मम्बायै निवेदयामि ।

भीमसेनः—बाढम्! गच्छ । (इति लतागृहस्य बहिर्वेदिकाया मुपविशति)

मन्द—(श्रुति माभिनीय)

समाश्वसिहि कल्याणि, दिष्ट्या! भामिनि वर्धसे ।
समागतो ऽयं मन्येऽहं वत्स स्ते ऽद्य घटोत्कचः ॥ १५॥

हिडि—(श्रुत्वा, सहर्षकौतुक मुपविश्य) हन्त भोः! कस्या ऽयं मधुरगम्भीरो निनादो मन्नाथस्य स्वरयोग मनुवर्तते ?

म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि ।
एतानि कस्य वचनानि महाशयस्य
कर्णामृतानि मनस श्च रसायननि ? ॥ १६ ॥

(इति साभिलाष मुत्प्रेक्षते)

घटो—(मातर मुपसृत्य) अम्ब! अभिवादये घटोत्कचो ऽहम् । (इत्यभिवादयते)

हिडि—(दृष्ट्वा, सानन्दम्) एह्येहि कुमार! स्वस्ति!

वक्षः प्रसारय कवाटपुटप्रमाणं,
आलिङ्ग मां सुविपुलेन भुजद्वयेन ।
उत्तामयाऽऽनन मिदं शरदिन्दुकल्पं,
प्रह्लादय व्यसनदग्ध मिदं शरीरम् ॥ १७ ॥

(पुत्र मुत्थाप्य, सादरं परिष्वज्य) वत्स! दीर्घायुष्मान् भव ।

सख्यौ—स्वागतं कुमारस्य!

घटो—एष वां शिरसा प्रणामपर्यायः ।

सख्यौ—कल्याणिन्! आयुष्मान् भूयाः!

हिडि—(सकौतुकम्) अयि वत्स, कि मानीतो मदुद्दिष्ट-लक्षणः कश्चित् पुरुषः?

घटो—(सवैलक्ष्यम्) अम्ब! न पुन रानीतो मया, किन्तु स्वय मेवाऽत्र कारुण्यात् समायात स्तादृशलक्षणोपेतः कश्चि न्महा-पुरुषः। (सदैन्यम्) मातः! कुतः खलु मे सामर्थ्यं तादृशं महा-सत्त्वं बलात्कारेण त्वत्समीप मानेतुम्? (इति समुद्विग्न स्तिष्ठति)

हिडि—(साश्चर्यकौतुक मात्मगतम्) हुदय! धीरं ताव द्भव! (प्रकाशम्) जात! कीदृशोऽयं मानुषः?

घटो—भवति! वाङ्मात्रेण मानुषः, न पुन वीर्येण!

हिडि—किं ब्राह्मणः?

घटो—न ब्राह्मणः।

मन्द—किं स्थविरः?

घटो—न स्थविरः।

करे—किं बालः?

घटो—न बालः।

हिडि—आयि वत्स! किं क्षत्रियः?

घटो—तरुणः क्षत्रिय एव! अम्ब! किं बहुना?

रक्षायां राक्षसारिं, प्रबलविमतविद्रावणे वीरभद्रं,
कारुण्ये रामभद्रं भुजबलविभवारोहणे रौहिणेयम्।
पाञ्चालं चञ्चलाक्षीपरिचरणविधौ, पूर्णचन्द्रं प्रसादे,
कन्दर्पे रूपदर्पे, तुलयति नितरां मानुषोऽयं महात्मा॥१८

हिडि—(आत्मगतम्)

भव हृदय! साऽभिनाषं,
संप्रति सन्देह निर्णयो जातः ।
आशङ्कसे य दग्नि
त दिह स्पर्शक्षमं रत्नम् ॥ १९ ॥

(प्रकाशम्) वत्स, यद्येवं, पश्यामि ताव देनम् ।

घटो—इत इतो भवती! (इत्युभौ परिक्रामतः)

भीम—(सकौतुकं, आत्मगतम्)

असुलभा सकलेन्दुमुखी च सा,
कि मपि चेद मनङ्गविचेष्टितम् ।
अभिमुखी ष्विव वाञ्छितसिद्धिषु
व्रजति निर्वृति मेकपदे मनः ॥ २० ॥

(दक्षिणबाहुस्फुरणं सूचयन्, सविस्मयम्)

स्पन्दते दक्षिणो बाहु र्वरस्त्रीलाभसूचकः ।
शान्तं तपोवनं चेदं कुतो वाऽस्य फलोदयः ॥ २१ ॥

अथवा, विचित्रा हि दैवघटना । हिडिम्बादेव्यध्युषितं खल्विदं तपोवनम् । कि नु खल्वय मुपवासनिसर्गपारणाध्यवसायो मत्स-मागमकाङ्क्षिण्या स्तस्या एव कश्चित् कपटोपायः स्यात् ?

उत्फुल्लगण्डयुग मुद्गतमन्दहासं
उद्वेलराग मुररीकृतकामतन्त्रम् ।
हस्तेन हस्त मवलम्ब्य कदा नु सेवे
सल्लॉरूप ममृतं सरसीरुहाक्ष्याः? ॥ २२ ॥

हिडि—(पुरुषं दूरत एव विलोक्य, सकौतुक मात्मगतम्) अहो!

विफुल्लपङ्कजप्रसूनकेसराग्रकोमलो
महेशसौम्यशेखरस्फुरत्सुधांशुनिर्मलः।
लतागृहे ऽत्र को ह्यसौ मनोजरूपखण्डनो
ददाति नेत्रयोः सुखं ममा ऽनुरूपमण्डनः॥ २३॥

(चिरं सानुरागं निर्वर्ण्य) अहो सौन्दर्य मस्य महापुरुषस्य!

सरोरुहं त्वस्य दृशैव तर्जितं,
जिताः स्मितेनैव विधो रपि श्रियः।
कुतः परं भव्य महो! महीयसी
ह्यस्या ऽऽननस्योपमितौ दरिद्रता॥ २४॥

अहो! दर्शनीयता ऽस्य मारसुन्दरस्य पुरुषचन्द्रस्य!

जगति जयिन स्तेते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवा ऽन्ये मनो मदयन्ति ये।
मम तु य दयं यातो लोके विलोचनचन्द्रमाः
नयनविषयं जन्म न्यस्मिन् स एव महोत्सवः॥२५॥

घटो— (भीमसेनं सभक्तिगौरवं विलोकयन्, स्वगतम्) अहो प्रभावातिशयो ऽस्य महापुरुषस्य!

विरोधो विश्रान्तः, प्रसरति रसो निर्वृतिघनः,
त दौद्धत्यं का ऽपि व्रजति, विनयः प्रह्वयति माम् ।
पुन र्दृष्टे ह्यस्मिन् कि मपि परवा नस्मि, यदि वा
महार्घ स्तीर्थाना मिव हि महतां को ऽप्यतिशयः॥२६॥

(ततः प्रविशति दूरतः कळत्रपुत्रसहितः केशवदासः)

सुशीला— (भीमसेनं दूरतो दृष्ट्वा) आर्यपुत्र! को ऽय मतिगम्भीरमधुरकल्याणाकृति र्महापुरुषः? यः किल

त्रातुं लोका निव परिणतः कायवा नस्त्रवेदः,
क्षात्त्रो धर्मः श्रित इव तनुं ब्रह्मघोषस्य गुप्त्यै ।
सामर्थ्याना मिव समुदयः, सञ्चयो वा गुणानां,
आविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः॥२७॥

केशवदासः—(दृष्ट्वा, सहर्षम्) आर्ये! अय मेवा ऽस्माकं प्राणदाता महानुभावो भीमसेनः ।

स कीचक - निषूदनो बक - हिडिम्ब - किम्मीर - हा
मदान्धमगधाधिप - द्विरदसन्धिबन्धाशनिः ।
मदापरिघमानिना भुजबलेन सम्मानितो
धनञ्जयगुरुः प्रिये! पवनसूनु रेवैष हि ॥ २८ ॥

कुशिकः—नून माशंसनीयपुण्यदर्शनो ऽयं महात्मा!

भरतः—(सोल्लासम्) कथं मध्यम - पाण्डवो वृकोदर एषः? दिष्ट्या! सुदिन मद्य य दयं महापुरुषधौरेयो दृष्टः!

सुगतः—तात, काम मेत दभिनन्दनीयम्, तथा ऽपि स्वभावः खल्वय मेतादृशानां परार्थैकपराणां महात्मनाम्!

पद्माकरं दिनकरो विकचं करोति,
चन्द्रो विकासयति कैरवचक्रवाळम् ।
ना ऽभ्यर्थितो जलधरो ऽपि जलं ददाति,
सन्तः स्वयं परहितेषु कृताभियोगाः ॥ २९ ॥

घटो—(भीमसेनं निर्दिश्य) पश्यत्वेन मम्बा महापुरुष माकारानुभावगाम्भीर्यशौर्यौदार्यसम्भाव्यमानवि वि ध लो को त्त र - सुचरितातिशयम् ।

हिडि—(निर्वर्ण्य सस्नेहानुरागं स्वगतम्)

वपु रविहितसिद्धा एव लक्ष्मीविलासाः
प्रतिकलकमनीयं कान्तिमत् केतयन्ति ।
अमलिन मिव रत्नं रश्मय स्ते मनोज्ञाः,
विकसित मिव पद्मं बिन्दवो माकरन्दाः ॥ ३० ॥

(प्रकाशम्) वत्स घटोत्कच, क एष महापुरुषः, यो ऽस्माकं कदळी-गृहस्य बहिर्वेदिकाया मस्या मुपविश्य परिश्रमविनोदं करोति?

सख्यौ—(देवी मनुसरन्त्यौ भीमसेनं दूरतो दृष्ट्वा)

अयं रामो! नाऽयं, स तु जनकधर्मं दलितवान्
अयं कामो! नाऽयं, स तु मधुमदामोदितमनाः ।
सखि! ज्ञातं, सोऽयं युवतिनयनोत्पादनफलं,
निदानं भाग्यानां, जयति खलु भीम स्तव पतिः ॥३१॥

घटो—(उपसृत्य) अम्ब! एष एव स महापुरुषः, य स्तवा ऽऽहारार्थं मानीतः।

हिडि—(उपसृत्य, भीमसेनं प्रत्यभिज्ञाय सानन्द मात्मगतम्) भोः किम प्येतत्!

कनकरुचिरस्निग्धच्छायः शिखण्डकमण्डनो
वनभूव मिमां पुण्यश्रीकः श्रियैव सभाजयन्।
पवनतनयो नूनं भर्ता स एष वृकोदरो
झटिति कुरुते दृष्टो यो मे दृशो रमृताञ्जनम् ॥३२॥

(प्रकाशं पुत्रं प्रति सरोषेव, ईषद्विहस्य) जात, किमेष वा महापुरुष स्त्वया मदाहारार्थं मानीतः?

घटो — (सविनयभयसम्भ्रमम्) भवति, को ऽयं महापुरुषः?

हिडि—उन्मत्तक! दैवतं खल्वयम्!

घटो—आः! कस्य दैवतम्?

हिडि—तव च, मम च!

घटो—कः प्रत्ययः?

हिडि— एष प्रत्ययः! जयतु जयत्वार्यपुत्रः। (इति भर्तारं प्रणमति)

भीम—(सहर्षसम्भ्रमं विलोक्य, स्वगतम्)

तम स्तमो! नहि नहि! मेचकाः कचाः,
शशी शशी! नहि नहि! दृक्सुखं मुखम् ।
लते लते! नहि नहि! सुन्दरौ करौ,
नभो नभो! नहि नहि! चारु मध्यमम् ॥ ३३ ॥
अहो सुमनोज्ञ मस्या द्वितीययौवनम्!
तन्वी, श्यामा, शिखरिदशना, पक्वबिम्बाधरोष्ठी,
मध्ये क्षामा, चकितहरिणीप्रेक्षणा, निम्ननाभिः ।
श्रोणीभारा दलसगमना, स्तोकनम्रा स्तनाभ्यां,
का वा ऽत्र स्यात् सुयुवति रियं सृष्टि राद्येव धातुः॥३४
(सम्यङ् निर्वर्ण्य, सानन्दं प्रत्यभिज्ञाय, प्रकाशम्)अये देवी हिडिम्बा!
अस्माकं भ्रष्टराज्यानां भ्रमतां गहने वने ।
जातकारुण्यया देवि! सन्तापो नाशित स्त्वया ॥ ३५ ॥
हिडिम्बे, किमिदम्?
हिडि— (ससाध्वसलज्जं कर्णे) एव मिव! मर्षयतु! मर्षयतु साहसं राक्षस्या मे प्राणनाथः!
भीम— (सस्मयं स्वगतम्) अहो "हैडिम्ब - वैदग्ध्यम्"! जात्यैवेयं राक्षसी, न पुनः समुदाचारेण । (सादरं विलोक्य)
आलोलै रनुमीयते मधुकरैः केशेषु माल्यग्रहः,
कान्तिः का ऽपि कपोलयोः प्रथयते ताम्बूल मन्तर्गतम् ।
अङ्गाना मवगम्यते परिमलै रालेपनप्रक्रिया,
वेषः को ऽपि विदग्ध एष सुदृशः सूते सुखं चक्षुषोः॥३६॥

हिडि—(घटोत्कचं प्रति) उन्मत्तक! अभिवादय पितरम् ।

घटो—(सोल्लास मात्मगतम्) हन्त! कथ मयं तातो मे!

ददतु तरवः पुष्पै रर्घ्यं फलै श्च मधुश्च्युतः,
स्फुटितकमलामोदप्राया: प्रवान्तु वनानिलाः ।
कल मविरळं रत्युत्कण्ठाः क्वणन्तु शकुन्तयः,
पुन रिद मयं पूज्य स्तातः स मे वन मागतः ॥३७॥

(सविनय मुपसृत्य सानन्दबाष्पं प्रकाशम्) भो स्तात! अहं स धार्तराष्ट्रवनदवाग्नि र्घटोत्कचो ऽभिवादये । (इत्यभिवादयते)

भीम—(सहर्षम्) आयुष्मन्! एह्येहि! (सस्नेह मालिङ्ग्य) अयि वत्स! कृतं कृत मतिविनयेन! अनेकवार मपरिश्रमं परिष्वजस्व मां पितरम् ।

परिणतकठोरपुष्कर-
गर्भच्छदपीनमसृणसुकुमारः ।
नन्दयति चन्द्रचन्दच-
निष्यन्दजड स्तव स्पर्शः ॥ ३८ ॥

केशव—(सहर्षं सपुत्रभार्यं उपसृत्य) भो भो महापुरुषधौरेय! पाण्डवमध्यम! दिष्ट्येदानां, अह मिव, भवा नपि अनुरूपकलत्रपुत्रसहितो वर्धते! सकुटुम्बस्य भवतः सर्वाभीष्टसिद्धि रस्तु!

ब्राह्मणवर्गः—अखण्डसाम्राज्यसिद्धि रस्तु!

पायात् सम्राजं त्वां देवः प्रथितभरतजनपदवरराजं,
देया दायु र्दीर्घं तुभ्यं त्रिजगदुदयलयविभवविनोदः ।
भूयात् साम्राज्यं वः प्राज्यं सकलविभवचयमहित ममेयं,
जीया दाचन्द्रार्कं भीमः प्रियतमतनयसुयुवतिसुखाढ्यः॥३९॥

भीम— (साञ्जलिबन्धम्) प्रतिगृहीतं ब्राह्मणवचनम् । अनुगृहीत श्चाऽस्मि भवतां महतां आशीर्वचनेन!

उच्चैर्गति र्जगति सिध्यति धर्मत श्चेत्,
तस्य प्रमा च वचनैः कृतकेतरै श्चेत् ।
तेषां प्रकाशनदशाऽपि महीसुरै श्चेत्
ता नन्तरेण निपतेत् क्व नु मत्प्रणामः? ॥४०॥

(इति साष्टाङ्गं प्रणमति)

केशव— (सश्लाघम्) उचित मेवैतत् कुरुवंशप्रदीपस्य धर्मपुत्रानुजस्य भवतः!

जन्म यस्य कुरो र्वंशे युक्तरूप मिदं तव ।
अचिरेणैव जित्वाऽरीन् भ्रातृभिः पाहि मेदिनीम् ॥४१॥

भीम—(सविनयम्) सर्वथेदानीं धन्याः स्मः ।

घटो—(आत्मगतम्) ईदृशो मां प्रत्यमीषा मकारणस्नेहः! मया पुन रेभ्य एवा ऽभिद्रुग्ध मज्ञेन, य दायुधपरिग्रहं याव दध्यारूढो दुर्योगः । (प्रकाशम्) मृष्यन्त्विदानीं घटोत्कचस्य बालिशतां तातपादाः ।

भीम—किं मपराद्धं वत्सेन? व्यतिक्रमकृतं कान्त मेव।

केशव—आम्! दुर्योगो ऽपि व्यतिक्रमकृतो नून मलङ्कारः शौर्यस्य! पश्य!

न तेज स्तेजस्वी प्रसृत मपरेषां प्रसहते,
स तस्य स्वोभावः प्रकृतिनियतत्वा दकृतकः।
मयूखै रश्रान्तं तपति यदि देवो दिनकरः
किं माग्नेयो ग्रावा निकृत इव तेजांसि वमति?॥४२॥

भीम—धार्तराष्ट्रवनदवाग्निपुत्रापेक्षीणि पितृहृदयानि। तत्, पुत्र! अतिबलपराक्रमो भव।

घटो—अनुगृहीतो ऽस्मि।

सुशीला—(सहर्षम्) एवं, अस्यैव भीमसेनस्य पुत्रोऽयं घटोत्कचः!

भीम—तनय, अभिवादय सपुत्रकळत्रं अत्रभवन्तं केशवदासम्।

घटो—(उपसृत्य) भगवन्तः! अभिवादये।

ब्राह्मणवर्गः—(हस्त मुद्यम्य) पितृसदृशगुणकीर्तिं भव!

घटो—(ब्राह्मणी मुपसृत्य) भवति, अभिवादये।

सुशीला—दीर्घायुष्मान् भव सौम्य!

घटो—अनुगृहीतो ऽस्मि।

हिडि—(ब्राह्मणवर्ग मवलोक्य साशङ्कम्) वत्स! क एते ब्राह्मणोत्तमाः?

घटो— (सवैलक्ष्यस्मितम्) अम्ब, एष वृद्धः केशवदासाख्यः कश्चिद् ब्राह्मणः। इयं च ब्राह्मणी अस्य धर्मपत्नी। एते च ब्राह्मणकुमारा अस्य पुत्राः। प्रथमत स्ताव देष एव मध्यम स्तवा ऽऽहारार्थं मया गृहीतः। कालहस्ता दिव जगदेकवीरै र्महापुरुषै रेभिः स्वप्राणविनिमयेन मोचित श्च।

हिडि—(सभयसम्भ्रमम्) भो ब्राह्मणोत्तमाः! अज्ञस्या ऽस्य मम कुमारस्य दुर्योगं चापलं च क्षन्तु मर्हथ।

केशव—भद्रे! न को ऽप्यपराधो वत्सस्य मातु राज्ञापरिपालनधुरन्धरस्य।

हिडि—(सानुशयम्) एषा ऽह मपराधिनी पुत्रसहिता भवतां पादवन्दनं करोमि। (इति ब्राह्मणपादयोः पतति)

केशव—(हस्त मुद्यम्य) भवति! सततं भर्तु र्बहुमता भव!

महेश्वरसमो भर्ता, महासेनसमः सुतः।
आशी रन्या न ते योग्या, पार्वत्या सदृशी भव॥ ४३॥

हिडि—धन्याऽस्मि! (ब्राह्मणी मुद्दिश्य) मातः! प्रणमामि।

सुशीला—कल्याणि! भर्तु र्बहुमानसूचकं महादेववीशब्द मधिगच्छ!

हिडि—कृतार्था ऽस्मि।

केशव—(भीमसेन मुद्दिश्य) भो महात्मन्! रक्षित मस्मत्कुलम्! स्वकुल मुद्धृत श्च! तद् गच्छाम स्तावत्।

भीम—(सादरम्) भो द्विजोत्तम!

अनुग्रहा त्तु भवतः सर्वमासी दिदं शुभम् ।
आश्रमो ऽदूरतो ऽस्माकं, तत्र विश्रम्य गम्यताम् ॥ ४४ ॥

केशव—कृत मातिथ्य मनेन जीवितप्रदानेनैव । तस्माद् गच्छाम स्तावत् ।

भीम—गच्छतु भावान् सकुटुम्बः पुनर्दर्शनाय ।

केशव—बाढम्! प्रथमः कल्पः!!

भीम—वत्स घटोत्कच, इत स्तावत् ।

घटो—आज्ञापयन्तु तातपादाः (इत्युपसर्पति)

भीम—(पुत्रं हस्तेन गृहीत्वा सानुनयम्) कुमार! यथा च, अत्रभवान् केशवदासः कळत्रपुत्रसहितः, अनपेतराक्षसं, श्वापद संकीर्णं तपोवन मिद मतिक्रम्य, स्वमातुलाधिष्ठितं उद्यामाग्रहारं सुखेन यास्यति, तथाऽय मप्रमादेन त्वया मार्गानुयायिना भूत्वा सम्भावनीयः! ब्राह्मणाः खल्वस्माकं कुलदैवतम्!

घटो—यथाऽऽज्ञापयति तातः!

ब्राह्मणवर्गः—महान् प्रसादः! महान् प्रसादः! हन्त! सम्पन्नः खल्वयं राक्षसप्रवीरो ऽस्माक मिदानीं मार्गपरिरक्षिता!

भीम—वत्स! शृणु ताव देत दपि ।

घटो—(जानुभ्यां स्थित्वा शिरसि निहिताञ्जलिः) आज्ञापयन्तु तातपादाः ।

भीम—(सस्नेहम्)

नित्यं प्राणाभिघातात् प्रतिविरम, कुरु प्राकृतस्यऽनुतापं,
यत्नात् पुण्यप्रवाहं समुपचिनु दिशन् सर्वसत्त्वे ष्वभीतिम् ।
मग्नं येना ऽत्र नैनः फलति परिणतं प्राणिहिंसासमुत्थं
दुर्गाधे वारिपूरे लवणपल मिव क्षिप्त मन्त र्हृदस्य ॥ ४५ ॥

हिडि—वत्स, नैष सामान्य उपदेशः! अनुल्लङ्घनीयः सर्वेश्वरस्येव पितु रादेशः खलु ते!

कथं नु जात शङ्कसे पितु र्हिता गिरो,
व्रज! व्रजाऽधुना द्विजान् वने धनुर्धरः ।
शमप्रधानभूसुरावने कृतादरः
सदा परोपकारकर्मबद्धपरिकरः ॥ ४६ ॥

केशव—नून मेतावा नेव धर्मोपदेशः सर्वेषा मपि प्राणिनाम्।

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
परोपकारः पुण्याय, पापाय परपीडनम् ॥ ४७ ॥

सर्व मेत दवधारय!

घटो—(सविनयम्) य दादिशति गुरुजनः!
अज्ञाननिद्रया सुप्तो भवता प्रतिबोधितः ।
सर्वप्राणिवधा देष विरतो ऽद्य प्रभृत्यहम् ॥ ४८ ॥

ब्राह्मणवर्गः—(सानन्दपरवशं गायन् नृत्यति)

(आङ्गली गीतिः)

खेल ! खेल ! खेल ! सततं - अनघ - शील ! सरभसम् ।
खेल! सुगुण, सरभसं । खेल ! सुनय, सरभसम् ।
कुशिक, खेल ! सुगत, खेल ! भरत, खेल ! सरभसम् ॥ खे ॥

साधु ! साधु ! साधु ! सुदिनं - इद मतीव - शुभकरम् ।
साधु - निचय - सुरुचिरं। श्लाघ्य - नृपति - सुखकरम् ॥
सकल - लोक - निवह - शोक - हरण - बद्ध - परिकरम् ॥खे॥

सास - गास - पाप - पगस - रिरिरि - मानि़ - रिससमा ।
धाध - संनिध - धपप - पा । माम - धपम - मगग - गा ॥
रिरिरि-मारि - ससग - पाग - रिरिरि - मानि़ - रिसस-सा॥खे॥

घटो—(ब्राह्मणा नुपसृत्य) भो ब्रह्मणाः! इतः परं भवद्विधेयो ऽस्मि संवृत्तः!

विप्राः स्वलाभसन्तुष्टाः पूज्या भूतसुहृत्तमाः ।
निरहङ्कारिणः शान्ता दुर्लभा हि भवादृशाः ॥ ४९ ॥

ब्राह्मणवर्गः—कल्याणिन्! अप्रतिमधैर्यशौर्यवीर्यगाम्भीर्यौदार्यैश्वर्यसम्पन्नो भव!

भीम—महान् प्रसादः!

केशव—परमोपकारिन् पवनात्मज! साधयामो वयम् । मातृभ्रातृपुत्रकलत्रमित्रपरिशोभितः प्राप्तास्वण्डराज्यो भूमण्डलं चिरं परिपालय!

आपन्नवत्सल ! जगज्जनतैकबन्धो !
विद्वन्मराळकमलाकर ! भीमसेन ।
जन्मादिकर्मविधुरैः सुमनश्चकोरै
राचम्यतां तव यशः शरदां सहस्रम् ॥ ५० ॥

(इति घटोत्कचेन समुपदर्शितमार्गः सकलत्रपुत्रो निष्क्रान्तः)

हिडि– (सखीभ्यां सह द्वारदेशं गत्वा लज्जावनतमुखी भीमसेन मपश्यन्तीव तिष्ठति)

भीम–(हिडिम्बां विलोक्य स्वगतम्)

चरणकमलकान्त्या देहळी मर्चयन्ती
कनकमयकपाटं पाणिना कम्पयन्ती ।
कुवलयमय मक्ष्णा तोरणं पूरयन्ती
वरतनु रिय मास्ते मन्दिरस्येव लक्ष्मीः ॥ ५१ ॥

मन्द–(अपवार्य) प्रियसखि ! कृतं त्वयेदानीं निर्मक्षिकं वन मिति मन्ये ।

हिडि–(ससाध्वस मपवार्य) सखि ! एतः शं साहसं कृत्वा वेपते मे मनः । न शक्नोमि सानुरागमप्यार्यपुत्रं सम्प्रेक्षितुम् ! (इति व्रीडया मुखं पटान्तेन संवृणोति)

भीम—(तथाऽवस्थितां प्रियां निर्वर्ण्य साशङ्कं सख्यौ प्रति) भद्रे ! किमर्थं वां प्रियसखी समुद्विग्नेव प्रतिभाति ?

मन्द—स्वागत मविलम्बिनो मनोरथस्य !

एषा पूगवती प्रफुल्लकुहलिः पर्यन्तचूतद्रुमा,
तन्मध्ये ऽपि सरोवरं निधुवनान्तानन्दमन्दानिलम् ।
तत्तीरे कदळीगृहं विलसितं तस्यान्तरे गल्लिका-
वल्लीमण्डप मत्र नः प्रियसखी त्वन्मार्ग मेवेक्षते॥५२॥

इतः शिलातलैकदेश मासनपरिग्रहेण समलङ्करोतु भर्ता ।

भीम—(उपविश्य) अयि प्रिये! किं मेव मौदासीन्यं भजसि? अल मल मायासेन । नन्वय माराधयिता जन स्तव समीपे वर्तते! त दुच्यताम्,

किं शीतलैः क्रमविनोदिभि रार्द्रपातान्
सञ्चारयामि नळिनीदळताळवृन्तैः ।
अङ्के निधाय चरणा वुत पद्मताम्रौ
संवाहयामि करभोरु! यथा सुखं ते ॥ ५३ ॥

हिडि—(ससम्भ्रम मपसृत्य, पदान्तरे प्रतिनिवृत्य, स्वगतम्) हा धिक्! हा धिक्!! इदं मत्प्रियतमस्य वचनं श्रुत्वा न मे चरणौ पुरोमुखौ प्रसरतः! (सनिन्दम्) हृदय, तथोत्तम्य पूर्वं, कथ मिदानीं न प्रतिपद्यसे? (इति प्रस्थातु मिच्छति)

भीम—सुन्दरि!

त्वं दूर मपि गच्छन्ती हृदयं न जहासि मे ।
दिवावसाने छायेव पुरो मूलं वनस्पतेः ॥ ५४ ॥

हिडि—न माननीयेषु जनेषु, आत्मान मपराधयिष्यामि! (इति गच्छत्येव)

भीम—(सखीं प्रति ससम्भ्रमम्) कि न्नु खलु सखीं वो बाधते कश्चित् शरीरसन्तापः?

करेणुका—(सस्मितम्) इदानीं लब्धौषधः, उपशमं गमिष्यति कालेन!

भीम—न खल्ववगच्छामि।

करे—आपन्नस्य जनस्य आर्तिहरेण क्षत्रियेण भवितव्य मिति—न न्वेष वो धर्मः?

भीम—ना ऽस्मात् परम्।

उत्खातान् प्रतिरोपयन्, कुसुमितां
श्छिन्वन्, लघून् वर्धयन्,
अत्युच्चा न्नमयन्, नतान् समुदयन्,
विश्लेषयन् संहतान्।
क्षुद्रान् कण्टकिनो वहि र्निरसयन्,
म्लानान् पुनः सेचयन्,
मालाकार इव प्रजार्तिहरणो
राजा चिरं नन्दति॥ ८९॥

करे—तेन हि, इयं नौ प्रियसखी, त्वद्विरहेणैव, इद मवस्थान्तरं भगवता मदनेन आरोपिता।

अनुरागवर्तिना तव
विरहेणोग्रेण सा गृहीताङ्गी ।
त्रिपुररिपुणेव गौरी
वरतनु रर्धावशिष्टेव ॥ ५६ ॥

हिडि— (करेणुका मवलोक्य) अल मल मुपरोधेना ऽस्य शुद्धान्तविरहपर्युत्सुकस्य ।

भीम—कथ मेवं, प्रिये, अनुरागैकरसं मा मुत्सृज्य निरपेक्षैव गच्छसि ?

अनिर्दयोपभोगस्य रूपस्य मृदुनः कथम् ।
कठिनं खलु ते चेतः शिरीषस्येव बन्धनम् ॥ ५७ ॥

मन्द—(हिडिम्बां सान्त्वयन्ती)

लिख ना स्ते भूमिं चिर मवनतः प्राणदयितः,
निराहारा मृग्यः विरहरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकैः,
तवा ऽवस्था चेयं विसृज कठिने ! मान मधुना ॥५८॥

भीम—देवि ! अल मन्यथा मां सम्भाव्य !

कोप स्त्वया हृदि कृतो यदि पङ्कजाक्षि,
शोचामि य त्तव कि मत्र विधेय मन्यत् ।
आश्लेष मर्पय मदर्पितपूर्व मुच्चैः,
उच्चैः समर्पय मदर्पितचुम्बन श्च ॥ ५९ ॥

हिडि—(आत्मगतम्) हृदय! स्वयमेव सुखोपनते मनोरथे, कथ मेवं कातरभावं वहसि?

मन्द—(सस्मितम्) परिकुपितेयं नः प्रियसखी! तत्, स्वय मेव देवीं हस्तेन गृहीत्वा सान्त्वयतु भर्ता।

भीम—(देवी मुपसृत्य)

मानं मानिनि मुञ्च, देवि दयिते मिथ्या वचः श्रूयते,
किं कोपो निजसेवके, यदि वचः सत्यं त्वया गृह्यते।
दोर्भ्यां बन्धन माशु, दन्तदळनं, पीनस्तनास्फालनं,
दोष श्चे न्मम, ते कटाक्षविशिखैः शस्त्रैः प्रहारं कुरु ॥६०॥

(इति सादरं हिडिम्बां हस्तेन गृहीत्वा, लतागृहं प्रविश्य, चन्द्रकान्तशिलाया मुपविशन्)

परिम्लानं पीनस्तनजघनसङ्गा दुभयतः,
तनो र्मध्यऽस्यान्तः परिमिलन मप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ॥६१॥

हिडि — अर्हति खलु महाभाग इमा मप्रियकारिणीं विसोढुम्।

भीम—(सस्मितम्)

अपराध मिमं ततः सहिष्ये,
यदि रम्भोरु! तवाऽङ्गसङ्गमृष्टे।
कुसुमास्तरणे क्रमापहे ऽस्मिन्
स्वजनत्वा दनुमन्यसे ऽवकाशम् ॥ ६२ ॥

हिडि—कोऽह मनुमन्तुं वा, निरोद्धुं वा? (इत्युपविशति)

भीम—कान्ते!

हिडि—नाथ!

भीम—विमुञ्च मानिनि रुषं,

हिडि—रोषान् मया किं कृतम्?

भीम—खेदोऽस्मासु,

हिडि—न मे ऽपराध्यति भवान्! सर्वेऽपराधा मयि।

भीम—तत् किं रोदिषि गद्गदेन वचसा?

हिडि—कस्याऽग्रतो रुद्यते!

भीम—न न्वेत न्मम?

हिडि—का तवाऽस्मि!

भीम—दयिता,

हिडि—नाऽस्मीत्यतो रुद्यते! ॥ ६३ ॥

भीम—(आत्मगतम्)

अप्यौत्सुक्ये महति, दयितप्रार्थनासु प्रतीपाः,
काङ्क्षन्त्योऽपि व्यतिकरसुखं कातराः स्वाङ्गदाने।
आबाध्यन्ते न खलु मदनेनैव, लब्धान्तरत्वात्,
आबाधन्ते मनसिज मपि क्षिप्तकाला स्तरुण्यः ॥६४॥

हिडि—अयि भोः सख्यौ!

कलयति मम चेत स्तल्प मङ्गारकल्पं,
ज्वलयति मम गात्रं चन्दनं चन्द्रक श्च ।
तिरयति मम नेत्रे मोहजन्मा ऽन्धकारो
विकृतबहुविकारं मन्मथो मां दुनोति ॥ ६५ ॥

सख्यौ—महाभाग,

आवासो विपिनायते, प्रियसखीमालाऽपि जालायते,
तापो निःश्वसितेन दावदहनज्वालाकराळयते ।
सेयं त्वद्विरहेण हन्त! हरिणीरूपायते, हा! कथं
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम्॥६६

(चतुष्पदी गीतिः)

पल्लवी

हा विरहे तव दीना । तन्वी
हा विरहे तव दीना ॥

चरणाः

निन्दति चन्दन मिन्दुकिरण मनु-
निन्दति खेद मधीरम् ।
व्याळनिलयमिळनेन गरळ मिव
कलयति मलयसमीरम् ॥ हा ॥

कुसुमविशिखशरतल्पमनल्प -
विलासकलाकमनीयम् ।

व्रत मिव तव परिरम्भसुखाय
करोति कुसुमशयनीयम् ॥ हा ॥

विलिखति रहसि कुरङ्गमदेन
भवन्त मसमशरभूतम् ।
प्रणमति मकर मथो विनिधाय
करे च शरं नवचूतम् ॥ हा ॥

ध्यानलयेन पुरः परिकल्प्य
भवन्त मतीव दुरापम् ।
विलपति, हसति, विषीदति, रोदिति,
भ्रमति, विमुञ्चति तापम् ॥ हा ॥

भीम—(हिडिम्बां हस्तेन सादर मालम्ब्य सान्त्वयन्) अयि प्राणेश्वरि !

व्यधयति वृथा मौनं, तन्वि ! प्रपञ्चय पञ्चमं,
तरुणि ! मधुरालापै स्तापं विनोदय दृष्टिभिः ।
सुमुखि ! विमुखीभावं तावद्विमुञ्च, न मुञ्च मां,
स्वय मतिशयस्निग्धो मुग्धे ! प्रियो ऽह मुपस्थितः॥६७

(चतुष्पदी गीतिः)

पल्लवी

प्रिये चारुशीले ! प्रिये चारुशीले !!

चरणाः

वदसि यदि किञ्चि दपि दन्तरुचिकौमुदी
हरतु दरतिमिर मतिघोरम् ।
स्फुरदधरशीधवे तव वदनचन्द्रमाः
रोचयतु लोचनचकोरम् ॥ प्रि ॥

स्मरगरळखण्डनं, मम शिरसिमण्डनं,
देहि पदपल्लव मुदारम् ।
ज्वलति मयि दारुणो मदनकदनानलो
हरतु तदुपाहितविकारम् ॥ प्रि ॥

नीलनळिनाभ मपि तन्वि! तवलोचनं
धारयति कोकनदरूपम् ।
कुसुमशरबाणभावेन यदि रञ्जयति
भीम मिद मेत दनुरूपम् ॥ प्रि ॥

त्व मसि मम भूषणं! त्व मसि मम जीवनं!
त्व मसि मम भवजलधिरत्नम्! ।
भवतु भवतीह मयि सतत मनुरोधिनी
तत्र मम हृदय मतियत्नम् ॥ प्रि ॥

(इति जानुभ्यां स्थित्वा हिडिम्बायाः पादयाः पतति)

हिडि—उत्तिष्ठतु! उत्तिष्ठतु आर्यपुत्रः!! (इति ससम्भ्रम मुत्थाप्य) अथ कथ मय मन्तःपुरविरहपर्युत्सुकेना ऽऽर्यपुत्रेण स्मृतो जनः? (इति साकूतं पश्यति)

भीम—(सगर्वहर्षं, आत्मगतम्)

आस्तां तावदनङ्गचापविभवः, का नाम सा कौमुदी?
दूरे तिष्ठतु मत्तकोकिलरुतं, संवाह्यतां मन्दानिलाः ।
हासोल्लासतरङ्गितै रसकलै र्नेत्राञ्चलै श्चञ्चलैः
साकूतै रुररीकरोति तरुणी सेयं मम प्रार्थनाम् ॥ ६८ ॥

हिडि—प्राणेश्वर !

त्वं तावद्बहुवल्लभो नवयुवा कान्तः सुखी निर्घृणो,
नो जानासि परव्यथां शठमते ! नैवाऽसि दुःखी यतः ।
किन्त्वन्याः परिपृच्छ मन्मथशरैः पीडा मसह्या मिमां,
त्राता नो भव, येन सज्जनगणैः कापालिको नोच्यसे॥६९॥

करे—भर्तः !

त्वयि दृष्ट एव चा ऽस्याः
निर्वाति मनो मनोभवज्वलितत् ।
आलोके हि शिमांशोः
विकसति कुमुदं कुमुद्वत्याः ॥ ७० ॥

मन्द—(उपसृत्य सविनयम्) महाभाग! इयं नौ प्रियसखी,
अङ्गेष्वाभरणं करोति बहुशः, पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते, वितनुते शय्यां, चिरं ध्यायति ।
इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत -
व्यासक्ताऽपि, विना त्वया, वरतनु नैषा निशां नेष्यति॥७१

भीम—(हिडिम्बां प्रति) प्रिये! अल मनया शङ्कया!

परिहर कृताशङ्के! शङ्कां, त्वया सततं घन-
स्तनजघनया ऽऽक्रान्ते स्वान्ते परानवकाशिनि।
विशति वितनो रन्या धन्या न काऽपि ममा ऽन्तरं,
स्तनभरपरीरम्भारम्भे विधेहि विधेयताम् ॥ ७२ ॥

हिडि—नाथ! अनुगृहीता ऽस्मि!

नित्यं ब्रह्म यथा स्मरन्ति मुनयो, हंसा यथा मानसं,
सानन्दाः स्फुटवल्लकीवनयुतां ध्यायन्ति रेवां गजाः।
युष्मद्दर्शनलालसाः प्रतिदिनं युष्मान् स्मरामो वयं
धन्यः कोऽपि सवासरो ऽत्र भविता यत्राऽऽवयोः सङ्गमः॥७३

भीमः—(सानन्दम्)

कल्याणि! चन्दनरसैः परिषिच्य गात्रं
द्वित्राण्यहानि कथ मप्यतिवाहयेयम्।
अङ्के निधाय भवतीं परिरभ्य दोर्भ्यां
नेष्यामि सूर्यकिरणा नपि शीतलत्वम् ॥ ७४ ॥

हिडि—(सानुरागं भीमसेनस्य कर मवलम्ब्य)

प्राणेश! विज्ञप्ति रियं मदीया,
ह्यत्रैव नेयाः दिवसाः कियन्तः।
सम्प्र त्ययोग्यस्थिति रेष देशः
करा हिमांशो रपि तापयन्ति ॥ ७५ ॥

भीम–(देवीं मालिङ्ग्य, स्वगतम्) अहो! सर्वाङ्गीणसुखावहत्वं प्रियायाः!

इयं गेहे लक्ष्मीः, इय ममृतवर्ति र्नयनयोः,
असा वस्याः स्पर्शो वपुषि बहुळ श्चन्दनरसः।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः,
कि मस्या न प्रेयो, यदि पुन रसह्यो न विरहः॥७६॥

(ऊर्ध्व मवलोक्य, सासूय मिव शयना दुत्तिष्ठन् सस्मितम्) प्रिये सत्य मुक्तम्। नोचित मत्र स्थातुं क्षण मपि!

झटिति प्रविश गेहं, मा बहि स्तिष्ठ कान्ते!
ग्रहणसमयवेळा वर्तते शीतरश्मेः।
तव मुख मकलङ्कं वीक्ष्य नूनं स राहुः,
ग्रसति तव मुखेन्दुं, पूर्णचन्द्रं विहाय॥ ७७॥

त देहि, अन्तःपुर मेव प्रविशामः।

हिडि–हन्त! धन्याऽस्मि! (इति सस्नेहानुरागं पतिं मवलम्ब्य परिक्रामति)

भीम—अहो सुखस्पर्शः!

प्रश्चोतनं नु हरिचन्दनपल्लवानां?
निष्पीडितेन्दुकरकन्दळजो नु सेकः?।
आतप्तजीवितततरोः परितर्पणो मे
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः?॥ ७८॥

(चतुष्पदी गीतिः)

पल्लवी

ननु भज भामे! दृढतरकामम् ।
जन मिम मनितरकामम् ॥ ननु ॥

चरणाः

दयिते! जन मिम मयि ते परिजन
मिति परिकलय सुशीले ! ।
सुशिथिलबाले शिथिलय चा ऽलं
ह्रिय मपि भिय मपि लोले ! ॥ ननु ॥

मुख मुन्नमय स्मितचन्द्रिकया
परिहर मम परितापम् ।
श्रुतियुग मयि मम निशमयितुं भृश-
कौतुक मिह पिकलापम् ॥ ननु ॥

विहसितभृङ्गै र्विलसदनङ्गैः
सकृदपि सुखया ऽपाङ्गैः ।
स्मरकृतभङ्गं सुदति! मदङ्गं
शिशिरय शिशिरै रङ्गैः ॥ ननु ॥

नतमुखि दयिते ! जगदभिरामे !
जितकुसुमायुधरामे ! ।

द्रुत मनुकूला भव ननु भामे!
सुतनु! मनोहरभा मे ॥ ननु ॥
प्रिये! किं ते भूयः प्रिय मुपहरामि?

हिडि—नाथ! अतः पर मपि प्रिय मस्ति?

संरक्षितो विप्रवरः सपुत्रः,
पुत्रो विनीत श्च घटोत्कचो मे।
प्राप्तो भवा निष्टतमो मया ऽद्य!
प्रार्थ्यं किं मन्य द्भुवि वर्तते मे ॥ ७९ ॥

तथाऽपि, इद मस्तु!

वृष्टिं हृष्टशिखण्डिताण्डवकृते मुञ्चन्तु काले ऽम्बुदाः,
कुर्वन्तु प्रविरूढसन्ततहरिच्छस्योत्तरीयां क्षितिम्।
चिन्वानाः सुकृतानि वीतविपदो, निर्मत्सरै र्मानसैः,
मोदन्तां सततं च बान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः॥८०॥

भीम—(सानन्दम्) सुन्दरि! सर्व मप्येतत् सर्वेश्वरस्य भगवतो वासुदेवस्य प्रसादात् सेत्स्यति!

यथा नदीनां प्रभवः समुद्रो,
यथा ऽऽहुतीनां प्रभवो हुताशः।
यथेन्द्रियाणां प्रभवं मनो ऽपि,
तथा प्रभु र्नो भगवा नुपेन्द्रः ॥ ८१ ॥

यस्य सङ्कल्पनायकस्य भगवतो नरसखस्य नारायणस्य दिव्यानि कर्माणि सर्वसंसारव्यवसायधर्मस्वरूपोपदेशरूपाणि, त मेव सर्वात्मस्वरूपं जगदेकनाथं जनार्दनं, अनन्यशरणाः,शरण मधिगम्य कृतार्था भवेम !

उभौ—(सभक्त्युन्मेषम्)

(चतुष्पदी गीतिः)

पल्लवी

जगति के यदुपते! निरवधिकगुणतते !

अनुपल्लवी

नुतिविधा वीश! ते कि मपि पुन रीशते ? ॥ जग ॥

चरणाः

जगदुदयभृतिविलय - रचनमयविहृतिचय -
रतहृदय! विततदय! विजयसख! जय विभो! ॥ जग ॥

शरणगतकृपणजन - मरणभयहरणभृश -
निपुणमृदुचरणयुग! विजयसख! जय विभो ! ॥ जग ॥

प्रणतसुरशरणवर! कृपणनरभरणकर!
धरणिभरहरणपर! विजयसख! जय विभो! ॥ जग ॥

जलधिपतिदुहितु रति - सुखविहृतिसुभगतर-
विपुलवरभुजविवर! विजयसख! जय विभो! ॥ जग ॥

(इत्युभौ निष्क्रान्तौ)

(भरतवाक्यम्)

(नेपथ्ये कुशीलवा गायन्ति)

श्री देवदेव! विभो! श्रितसकलबन्धो!
श्रीगौरीवल्लभ भो! श्रीकरुणासिन्धो!
वेदे च वेदान्ते विदितपरब्रह्मन्!
विहितजगदुदयलय - विभवशुमकर्मन्।
भो देहि भोग्यतमं भुवनेड्यचरित!
भुवनपते! परमगते! बुधविनुतसुकृत!
आ देशा दभिविदितां अव सततं सुशुभां
अगणितसत्सभ्ययुतां सुगुणविलाससभाम्! ॥ ८२ ॥

—(०)—

इति
तृतीयः प्रघट्टकः
समाप्तः

समाप्त श्चाऽयं
हैडिम्बवैदग्ध्यापरनामधेयो
मध्यम - व्यायोगः
शुभं भूयात्

PRINTED AT THE SIVARAHASYAM PRESS, P. T., MADRAS.

हैडिम्ब वैदर्भ्य - व्यायोगगतनां

पद्यानामनुक्रमणी



पद्यानां आरम्भः	ग्रंथ टीकः	पद्य सं	पुट सं
अङ्गेष्वाभरणं	तृ	७१	९४
अज्ञाननिद्रया	तृ	४८	८३
अतः परं यद्	द्वि	१८	४०
अथ कोऽय	द्वि	२८	४५
अनिर्देयोप	तृ	५७	८८
अनुग्रहात्तु	तृ	४४	८२
अनुरागवर्तिना	तृ	५६	८८
अन्तर्गता मदन	तृ	१०	६८
अन्धंतमः ककच	द्वि	१६	३९
अपराध मिमं	तृ	६२	८९
अपूर्वकर्म	प्र	१०	४८
अप्यौत्सुक्ये	तृ	६४	९०
अमृताभ्रात	प्र	४२	२९
अयं रामो नाऽयं	तृ	३१	७१
अय मसौ गगना	द्वि	१९	४०
अरुणरविकर	प्र	१	१५
अश्मसार मिदं	प्र	३१	२६
असुलभा सकले	तृ	२०	७०
अस्माकं भ्रष्ट	तृ	३५	७७
आक्रम्य राक्षस	द्वि	६०	६२
आचम्याऽस्यां	द्वि	३३	४८
आज्ञा कीर्तिः	द्वि	४७	५३
आत्मीयः पर	द्वि	१२	३८
आपदं हि पिता	प्र	२६	२४
आपन्नवत्सल	तृ	५०	८५
आयाता मधु	तृ	१	६३
आयुः कल्लोल	द्वि	४	३६
आर्त कण्ठगत	द्वि	५०	५४
आलोलै रनु	तृ	३६	७७
आवासो विपिना	तृ	६६	९१
आश्वासस्नेह	द्वि	२३	४३
आस्तां तावदनंग	तृ	६८	९४
इदं हि शून्यं	प्र	१२	२०
इयं गेहे लक्ष्मीः	तृ	७६	९६
उच्चैर्गति र्जगति	तृ	४०	७९
उत्खातान् प्रति	तृ	५५	८७
उत्फुल्लगण्डयुग	तृ	२२	७२
एषा पूगवती	तृ	५२	८६
कः पाण्डवे वन	द्वि	३४	४९
कथं नु जात	तृ	४६	८३
कनकरुचिरस्निग्ध	तृ	३२	७६
कलभदशनदंष्ट्रो	प्र	३	१५
कलयति मम चेतः	तृ	६५	९१
कल्याणि चन्दन	तृ	७४	९५
काञ्चनस्तम्भ	द्वि	५४	५६
कान्ते ! नाथ,	तृ	६३	९०

कामं घटो वा	द्वि	५२	५५
कालिदासकवे	स्था	३	८
किं यासि मन्द्रय	प्र	६	१६
किं शीतलैः	तृ	५३	८६
किं न्नु पापं कृतं	प्र	२९	२६
किं महं श्रुतवान्	प्र	१८	२२
किसलय मिव मुग्धं	तृ	८	६७
कुलस्य व्यापत्या	द्वि	३६	५०
कुसुमपरिमलेना	द्वि	९	३७
कृतकृत्यं शरीरं मे	प्र	२०	२३
कृत्ययो विप्रतीप	प्र	३९	२८
केलीगेहं ललित	तृ	३	६५
कोप स्त्वया हृदि	तृ	५९	८८
कोपेन प्रविधृत	प्र	११	१९
कौरव्यकुलदीपेन	द्वि	४३	५२
क्रोडीकरोति	द्वि	३२	४८
क्षतात् किल	द्वि	५१	५४
खगशतविसृते	द्वि	२०	४२
ग्रहयुगळनिभाक्षः	प्र	२	१५
चरण्यकमलकान्त्या	तृ	५१	८५
छायां प्रकुर्वन्ति	द्वि	१०	३७
जगति जयिनः	तृ	२५	७३
जन्मनः प्रभृति	प्र	३६	२८
जन्म यस्य कुरो	तृ	४१	७९
जानस्य हि ध्रुवो	प्र	३५	२७
जानामि सर्वत्र	प्र	७	१६
जायन्तेच म्रियन्तेच	द्वि	४८	५३
ज्येष्ठो भ्राता	प्र	२४	२४
ज्येष्ठः श्रेष्ठः	प्र	२३	२४
झटिति प्रविश	तृ	७७	९६
तत् किं का मपि	तृ	२४	६९
तन्वी श्यामा	तृ	३४	७७
तमस्तमो नहि नहि	तृ	३३	७७
तरुण! तरुणता	प्र	४४	३०
त्यक्ताः प्रागेव	द्वि	४६	५३
त्यजे देकं कुल	प्र	३७	२८
त्रातुं लोकानिव	तृ	२७	७४
त्वं ताव द्बहुवल्लभो	तृ	६९	९३
त्वं दूरमपि	तृ	५४	८६
त्वयि दृष्ट एव	तृ	७०	९४
दक्षिणं स्पन्दते	द्वि	५९	६१
ददतु तरवः	तृ	३७	७८
दूरं तिष्ठति मे	तृ	७	६६
दृष्टि स्तृणीकृत	द्वि	३७	५०
देशेदेशे कळत्राणि	प्र	४७	३२
धन्यो ऽस्मि यद्	प्र	२८	२५
ध्रुवं ध्वंसो भावी	द्वि	१३	३८
न तेज स्तेजस्वी	तृ	४२	८०
नन्वहं भीमसेनस्य	द्वि	५६	५८
नवकिसलयतल्पं	तृ	१३	६९
निकृन्ततीव	प्र	४६	३१
निवृत्तव्यवहारो	द्वि	३९	५१
नित्यं प्राणाभिघातात्	तृ	४५	८३
नित्यं ब्रह्म यथा	तृ	७३	९५
नेष्टं न दत्तं	द्वि	१७	४०
पति र्हि देवता	प्र	२१	२३
पत्न्या चारित्र	प्र	१७	२२
पद्माकरं दिनकरो	तृ	२९	७५
परिणतकठोर	तृ	३८	७८
परित्राणाय	प्र	४८	३२
परिम्लानं पीन	तृ	६१	८९
परिष्वजस्व गाढं	प्र	४१	२९
परिहर कृताशङ्के	तृ	७२	९५
परोपकारः कर्तव्यः	प्र	८	१७

पादाघातैः सुरभि	तृ	११	६८
पायात् समाजं	तृ	३९	७९
पायात् स वो	स्था	१	६
पुत्रनक्षत्रकीर्णस्य	द्वि	३८	५०
पूर्वं यत्र समं त्वया	तृ	२	६४
प्रणयसतीसलील	द्वि	४५	५२
प्रश्नोतनं नु	तृ	७८	९६
प्राणाः प्रयान्ति	प्र	३०	२६
प्राणेश! विज्ञप्ति	तृ	७५	९५
प्राप्ताः श्रियः	द्वि	५	३६
प्रार्थनाऽधिगुणे	प्र	१४	१२
ब्रह्मा वा भवतु	प्र	१०	१८
भव हृदय साभि	तृ	१९	७२
भाषासु रम्या	स्था	६	९
भीमो वा शरणं	प्र	९	१७
भ्रातॄणां मम	द्वि	४०	५१
मधुरं मिव वदन्ति	द्वि	८	३७
मध्यमस्त्विति	द्वि	२७	४५
मध्यमः पञ्चभूतानां	द्वि	२६	४४
मध्यमोऽह	द्वि	२५	४४
मन्त्रसंस्कार	द्वि	११	३८
मम प्राणै र्गुरु	प्र	२२	२४
मरणं प्रकृतिः	द्वि	२	३५
महेश्वरसमो	तृ	४३	७०
मात र्मायें	द्वि	७	३७
माता किल	द्वि	४२	५१
मानं मानिनि	तृ	६०	८९
मामिकेयं तनु	प्र	२५	२४
मायापाशेन बद्ध	द्वि	५८	६०
मुच्यतामिति	द्वि	४१	५१
मृत्यो र्बिभेषि	द्वि	१	३५
मेदोमज्जाशोणितैः	प्र	२७	२५
म्लानस्य जीव	तृ	१६	७०
यत्ने कृते यदि	प्र	१५	२१
यदृच्छयाचोप	प्र	३८	२८
यदृच्छासम्पातः	द्वि	३१	४७
यद्यर्थितो	प्र	१९	२३
यथा नदीनां	तृ	८१	९८
य स्तु जात्या	स्था	५	९
यस्त्रिशृङ्गो	प्र	४३	३०
याचना हि पुरुषस्य	प्र	१६	२२
युद्धप्रिया श्च	प्र	१३	२०
येषां श्रीमद्यशोदा	द्वि	२९	४६
रक्षायां राक्षसा	तृ	१८	७१
रूपं सत्त्वं बलं	द्वि	४४	५२
लिख न्नास्ते भूमिं	तृ	५८	८८
लोके मालविका	स्था	४	९
वक्षः प्रसारय	तृ	१७	७०
वज्रपातो	प्र	४	१६
वपु रविहितसिद्धा	तृ	३०	७५
वर मद्यैव	द्वि	१५	३९
वारं वार मुदश्रु	तृ	४	६५
विख्यातः कवि	स्था	७	१०
विदूरे केयूरे	तृ	५	६६
विनिमाय गुरु	प्र	३२	२७
विप्राः स्वलाभ	तृ	४९	८४
विफुल्लपङ्कज	तृ	२३	७३
विरमत! विरँमत	तृ	९	६८
विरोधो विश्रान्तः	तृ	२६	७४
विश्वकर्ता शिवः	द्वि	५५	५६
विश्वामित्रः	प्र	२८	२५
वृष्टिं हृष्टशिखण्डि	तृ	८०	९८
वेदस्याऽध्ययनं	द्वि	३०	४७
व्यतिषजति पदा	द्वि	२२	४३

व्यधयति बुधा	तृ	६७	९२
व्रजसि कथ मिव त्वं	द्वि	५७	५८
शकारः श्रीहर्षो	स्था	२	८
शपामि सत्येन	द्वि	५३	५६
शय्या पुष्पमयी	तृ	१२	६८
शैलकूटं मृषा	द्वि	५५	५७
श्रान्तैः सुतैः	स्था	९	१२
श्रियो दोलालोलाः	द्वि	३	३६
श्रीदेवदेव! विभो	तृ	८२	१००
श्लोकार्धेन प्रव	तृ	४७	८३
संरक्षता मत्कुल	द्वि	६	३६
संरक्षितो विप्रवरः	तृ	७९	९८
सकीचकनिसूदनो	तृ	२८	७४
सजलजलदगात्रः	द्वि	३५	४९
सत्यं बतेदं	प्र	३३	२७
सन्दष्टोष्टः	प्र	५	१६
समाश्वसिहि	तृ	१५	६९
सरोरुहं त्वस्य	तृ	२४	७३
सर्वाशुचि निदा	द्वि	४९	५४
सिंहाकृतिः कनक	द्वि	२४	४४
सिंहास्यः सिंह	द्वि	२२	४२
सुखा द्विहीनं	प्र	३४	२७
स्पन्दते दक्षिणो	तृ	२१	७२
हारं गुरुक्रति	तृ	६	६६
हा वत्स! हा तनय	प्र	४५	३०
हाहा किन्नु करोमि	प्र	१४	३९

हैडिम्ब वैदग्ध्य - व्यायोगगतानां गीतीना मनुक्रमणी

पल्लवीप्रारम्भः	प्रघट्टकः	पुटसंख्या
एकश इह मम	प्र	३१
कुरु! कुरु विक्रमं	द्वि	५९
खेल! खेल! खेल सततं	तृ	८४
जगति के यदुपते	तृ	९९
ननु भज भामे दृढतरकामं	तृ	९७
प्रिये चारुशीले	तृ	९२
भज गोविन्दम्	द्वि	४५
महनीयचरितेन	स्था	१०
या म्यहो क मिह शरणं	तृ	६६
विजयतां परेशिता	स्था	५
हा विरहे तव दीना	तृ	९१
हा हा! कि मेतत् स्वरूपम्	प्र	१३

APPENDIX

(Songs to be optionally sung by the actors)

Insert after ".....पालये नः ॥" at line 4, page 11, the following अष्टपदी to the speech of पारिपार्श्वक—

I. मालवरागः—रूपकतालः

पल्लवी

केशव! धृत-दशविधरूप!
जय! जगदीश! हरे!

चरणाः

प्रळयपयोधिजले धृतवा नसि वेदं,
विहित-वहित्र-चरित्र मखेदम् ।
केशव! धृत-मीनशरीर!
जय! जगदीश! हरे ॥ १ ॥

क्षिति रतिविपुलतरे तव तिष्ठति पृष्ठे,
धरणि-धरण-किण-चक्रगरिष्ठे ।
केशव! धृत-कच्छपरूप!
जय! जगदीश! हरे ॥ २ ॥

वसति दशनशिखरे धरणी तव लग्ना,
शशिनि कलङ्क-कलेव निमग्ना ।
केशव! धृत-सूकररूप!
जय! जगदीश! हरे ॥ ३ ॥

तव करकमलवरे नख मद्भुतशृङ्गं,
दलित-हिरण्यकशिपु-तनुभृङ्गम् ।
केशव! धृत-नरहरिरूप!
जय! जगदीश! हरे ॥ ४ ॥

छलयसि विक्रमणे बलि मद्भुतवामन,
पदनखनीर-जनितजनपावन ।
केशव! धृत-वामनरूप!
जय! जगदीश! हरे ॥ ५ ॥

क्षत्रियरुधिरमये जग दपगतपापं,
स्नपयसि पयसि शमित-भवतापम् ।
केशव! धृत-भृगुपतिरूप!
जय! जगदीश! हरे ॥ ६ ॥

वितरसि दिक्षु रणे दिक्पतिकमनीयं,
दशमुख-मौलिबलिं रमणीयम् ।
केशव! धृत-रामशरीर!
जय! जगदीश! हरे ॥ ७ ॥

वहसि वपुषि विशदे वसनं जलदाभं,
हलहतिभीति - मिलितयमुनाभम् ।
केशव! धृत - हलधररूप!
जय! जगदीश! हरे ॥ ८ ॥

निन्दसि यज्ञविधेः, अहह! श्रुतिजातं,
सदयहृदय - दर्शितपशुघातम् ।
केशव! धृत - बुद्धशरीर!
जय! जगदीश! हरे ॥ ९ ॥

म्लेच्छनिवहनिधने कलयसि करवालं,
धूमकेतुमिव किमपि करालम् ।
केशव! धृत - कल्किशरीर!
जय! जगदीश! हरे ॥ १० ॥

Add the following song to **घटोत्कच** as he enters the stage before **कनिष्ठ** begins his speech at p. 13 :—

II. रागः—एकतालः

पल्लवी

अहहह! अहहा!! अहाह! अहहा!!
अहो नु! मम खलु भाग्यमिदम्!।

अनुपल्लवी

अभिनवरुधिराऽऽसवपानेच्छोः !
अधुना मम खलु भोग्यमिदम् ॥ अहहह ॥

चरणौ

पृथुळनरामिष - मेदोतिभरं,
भळि ! भळि ! कोष्णवाशानिकरम् ।
पिबामि ! पिबामि ! ! पिबामि रुधिरम् ,
पिबामि रुधिरं - प्रीतिकरम् ॥ अहहह ॥

नरदेहोद्धृत - नवनवपिशितं
नखचमसेन - निकृत्या ऽदन् ।
नृत्यामि ! नृत्यामि !! नृत्यामि निरतं,
नृत्यामि निरतं - तकतीं तोम् ॥ अहहह ॥

At the end of page 14 add the following song to घटोत्कच before वृद्ध begins his speech at page 15 :—

III. काम्बोजरागः—झम्पतालः

पल्लवी

अहह ! इत भूसुराः - अन्तिकं मे ।

अनुपल्लवी

अत्रैव तिष्ठथ ! अभिमुखे मे ॥ अहह ॥

चरणाः

विहितनरपायसं - वीरोग्रसाहसम् ।
विद्ध मां राक्षसं - विकृतहासम् ॥ अहह ॥

मदृष्टिपथ मेत्य - मानुषो भुविको ऽपि ।
मा ऽनितुं शक्नुयात् - मारकोऽपि ॥ अहह ।

भङ्क्त्वा शिरांसि वो - भक्षयिष्याम्यहम् ।
भवदीय मांसादि - भक्ष्यनिवहम् ॥ अहह ॥

At the end of page 17, add the following song to the ब्राह्मणी—

IV. रागः—एकतालः

पल्लवी

नाथ! कृपालय! परिपालय माम् ।
पापनिशाचर - रचिताधि मिमाम् ॥

चरणाः

त्रपया लपितु मनीशा मपि मां,
व्यसनभरो हि कथापयतीमाम् ।
वनिताना मिह वचनं परुषं,
विषहेथा मम रुगधिकपरुषम् ॥ १ ॥ नाथ ॥

निगदित मिद मयि! निशमय च विधे!
शुच मिह मम शमय च शमजलधे।
वनितावञ्च इति न वचो हेयं
मम, किमु गव्यं शकृदिति हेयम् ॥ २ ॥ नाथ ॥

व्यसन मनोपम मुदित मनूनं,
मम तु मनोगत मधुना नूनम्।
परम मतो नत-जगदवने रत!
प्रभु रिह तु भवान् ननु भुवनहित ॥ ३ ॥ नाथ॥

After the words ".....नाऽत्र संशयः!" at line 8, page 18, add the following song to the वृद्ध and the other ब्राह्मणवर्ग—

V. रागः—एकतालः

पल्लवी

याम इमे शरणं त्वाम्! यदुवर,
याम इमे शरणं त्वाम्!

चरणाः

वृद्धः—बोधमया ऽव्यय! लोकहिताय हि
भजसे रूप मनन्तम्।
यत्स्मरणा दपि भवसागर मिह
सपदि तरन्ति दुरन्तम् ॥ १ ॥ याम ॥

ब्राह्मणी—**मु**रहर! खलनृप-कृतभूभारं
व्यवहर सहसोदारम् ।
माधव! मान्यान् ननु तनया नो
परिपालय तरसा नो ॥ २ ॥ याम ॥

ज्येष्ठः—**त्व**यि विमुखानां पतनं सुनियतं,
अपि सुमहितभाजाम् ।
का ऽपि, कुतो ऽपि, न हानि रिहा ऽजित!
तव सुललितपदभाजाम् ॥ ३ ॥ याम ॥

मध्यमः—**स्म**रण-स्मारण-निकथन-निशमनं
अयि! खलु, तव तनु-नाम्नाम् ।
जगति वितन्वन् जनिमृति मेतां,
एति न सुमहितधाम्नाम् ॥ ४ ॥ याम ॥

कनिष्ठः—**भ**वहर! तनुते भव पाथोधिं
भरिताधिकमहिताधिम् ।
गोवत्सपदं त्वयि तु समाधिं
विदध द्विहितसमाधिम् ॥ ५ ॥ याम॥

Substitute the following song in place of stanza 27 "मेदोमज्जा etc" at page 25 for मध्यम—

VI. शंकराभरणरागः—यतितालः

पल्लवी

त्यजरे मानस! देहे, अहमिति मोहम् ।

अनुपल्लवी

विजयता मजपादपङ्कज-रतिरिह, सोऽहम् ॥

चरणाः

निखिलमलिनतर-पिशितादिभारे ।
अखिल मशुचिजालं विशति यतोऽधीरे ॥ १ ॥ त्यज॥

शमनघातुकमुखे विकसति सदाऽपि ।
किमु फल मुपचित-सकलमण्डलेनाऽपि ॥ २ ॥ त्यज॥

सकलरोगनिकेते षडरिपरिभूते ।
मकरकेतनालाते जडिमकुटिलभूते ॥ ३ ॥ त्यज ॥

शकृदुपचितोदरे कृमिकुलदन्तुरे ।
सकलविपुलदरे सुतरा मसारे ॥ ४ ॥ त्यज ॥

After "गच्छामि" at line 2, page 30, add the following song to मध्यम—

VII. बिलहरिरागः—आदितालः

पल्लवी

पिब मौकुन्दं पदमकरन्दम् ।

अनुपल्लवी

हृदय! वितृष्णं भव, भज! कृष्णम् ॥ पिब ॥

चरणाः

विषयाशीविषशोषितमनसां
अनधिगतात्मविचारविशीर्णम् ।
विषमविपाकपदं गत मायुः
केवल मायासायुतघूर्णम् ॥ १ ॥ पिब ॥

एते जाता जगति जिता यैः
तनुभवखेदा स्त्वतनुविपाकाः ।
एते चाऽन्ये परपरिवाराः
हाहा ! हीही ! खरपरिपाकाः ॥ २ ॥ पिब ॥

भारायन्ते नात्मविदां ते
वेदाः श्रुत मपि तद्वत् सर्वम् ।
हारायन्ते हन्त ! विवेका -
ह्लादितमनसां दृढगुणपूर्वम् ॥ ३ ॥ पिब ॥

After stanza 1 at page 35—"मृत्यो बिभेषि etc" add the following song to मध्यम—

VIII. देशितोडिरागः—आदितालः

पल्लवी

भज ! रे मानस ! हरि मनवरतम् ।

अनुपल्लवी

त्यज ! रे ! दुर्जन - सङ्गं सततम् ॥ भज ॥

चरणाः

अजहरनारद - सादरविनुतं,
अज माद्दतनति - नुतिततनिरतम् ।
श्रीगुरुमारुत - पुरकृतसुकृतं
श्रीगुरु मीड्यमनोहरचरितम् ॥ १ ॥ भज ॥

धन मायु रहङ्कारमनांसि,
तृष्णा वपु रपि, यौवनबाल्ये ।
युवतिजरे पुन रथ कालोऽपि
प्राज्ञै रनुचिन्त्यानि हि कल्ये ॥ २ ॥ भज ॥

न हि परमानन्दाय धनानि,
चिन्तानिचयविपद्भवनानि ।
विहितविचित्र - गृहादिवनानि,
तत्त्वपयोजपयोददिनानि ॥ ३ ॥ भज ॥

इद मिह सज्जन - सङ्गमहेळां
जनयति वाद - द्यूतविलासम् ।
मद मपि चेतसि जृम्भितडम्भं
विसृज विदूरे दोषविकासम् ॥ ४ ॥ भज ॥

Substitute the following song in place of stanza 5, at page 36,—"प्राप्ताः श्रियः etc" for मध्यम—

IX. खरहरप्रियरागः—एकतालः

पल्लवी

मोहेन किं भ्राम्यसि ? मुग्धमते !

अनुपल्लवी

मायासु विश्राम्यसि ! मुग्धमते ॥ मोहेन ॥

चरणाः

अधरघनजघन - पृथुळपयोधरम् ।
विधुरविवेक मनो - नाथयसि दुर्वारम् ॥ १ ॥ मो ॥

वीतविषयचयं - विरहिताशामयम् ।
विहतविलोलामयं - वितनु मनः स्वयम् ॥ २ ॥ मो ॥

घोरदुरितगण - हरण नारायण -
गिर मनुधारण - मारचय निद्राण ॥ ३ ॥ मो ॥

After stanza 11 at page 38—"मन्त्रसंस्कार etc" add the following song to मध्यम—

X. सौराष्ट्रागः—आदितालः

पल्लवी

स्मर ! स्मर ! सुमते !
सोमं सोमं सोमं सोमम् ॥

चरणाः

परनिन्दारति - परकान्तारति -
पुरनरस्तुतिमतिं - वामं वामं वामं वामम् ॥ १ ॥ स्म ॥

चरणं तद्गतौ - करणं तद्धृतौ,
स्मरणं तच्छ्रुततौ - कामं कामं कामं कामम् ॥२॥स्म॥

इति नारायण - मतिपारायणं
हितपरायण मिह - नामं नामं नामं नामम् ॥ ३ ॥ स्म ॥

Add the following song to **भीमसेन** as he enters the stage before "**भोः कस्याऽयं स्वरः?**" at line 2, page 42—

XI. **कल्याणिरागः—रूपकतालः**

पल्लवी

शङ्कर! शशि - शकलशेष!
शम्भो! शं देहि! देहि!

चरणाः

नसितसमित - मृदुळचरण!
हसितशसित - त्रिपुरकरण।
भसितभसित - त्रिसरधरण
लसितलसित - भुजगाभरण ॥ १ ॥ शङ्कर ॥

सुकरकलित - विध्वभिख्य!
सूक्ष्मबृह - दाद्यभिख्य ।
सुक्तिभि र्ना - रायणाख्य -
सूरिमणेः - सन्नुताख्य ॥ २ ॥ शङ्कर ॥

At the end of page 48 after ".....पापराक्षसोऽयम्' add the following song to the old Brähmaṇa केशवदास—

XII. राग:—एकताल:

पल्लवी

जीवितनायक! जीवितदानात्
वीर! दयापर! जीवय दीनान् ।

चरणा:

खलजनदमनो निजमवतारं
फलयसि कुशलतते रवतारम् ।
अलभत तव मुखदर्शन मिह वरं
यदिदं जननवता मजनि वरम् ॥ १ ॥ जीवित ॥

अनुकम्पालय! नो विवशानां
अनुकं पालय शोकवशानाम् ।
सुतजीवितवितरणतः सुमते!
प्रतिजीवय नो, रुषमपि विमतेः ॥ २ ॥ जीवित ॥

नारायणरत नरसोदर! तव
पादसरोजं प्रणामामः ।
शरणं कुरु वर! त्वा मुपयामो
शरणं त्वा मिह कलयामः ॥ ३ ॥ जीवित ॥

After stanza 59 at page 61—"दक्षिणं स्पन्दते etc", add the following song to भीमसेन—

XIII. जञ्झोटीरागः—एकतालः

पल्लवी

नाम शिवस्य - नाऽऽमनसि!।

अनुपल्लवी

वामनयनां मनः! कामयसि! ॥ नाम ॥

चरणौ

सूनुसुदती - सोदराप्तदास -
सविधे ऽपि निर्याण - समय मनु ।
हन्त! यमे ऽपि - हरति सन्तापि
हाहा! ऽनुतप्तासि - हा! किमिति? ॥ १ ॥ नाम ॥

आगृहा रामाः - आविदाहा इमाः,
सहगामितां याति - सुकृत मिति ।
नैव दधासि - न सुजनं यासि
नारायणोक्ति न धारयसि ॥ २ ॥ नाम ॥

At the end of page 62, add the following song to मध्यम—

XIV. कल्याणिरागः—रूपकतालः

पल्लवी

माधव! मधु - हरण! धीर!
माराभिराम! राम!

चरणः

कमलनयन! कमलशयन!
कमलाकुचकरनयन!
कलिलजनकदम्भदलन
कलय! कलय!! कलय शं मे ॥ माधव ॥

At the end of page 63, after the words—'एकाकी निवसति?' add the following song to हिडिम्बा—

XV. आनन्दभैरवरागः—आदितालः

पल्लवी

सख्यौ पति मिह विहितविलासं ।

अनुपल्लवी

स्मरति मनो मम कृतपरिहासम् ॥

चरणाः

चन्द्रकचारु - मयूरशिखण्डक -
मण्डलवलयितकेशम् ।
प्रचुरपुरन्दर - धनुरनुरञ्जित -
मेदुरमुदिरसुवेशम् ॥ १ ॥ सख्यौ ॥

जलदपटलचल - दिन्दुविनिन्दक -
चन्दनतिलकललाटम् ।
पीनपयोधर - परिसरमर्दन -
निर्दयहृदयकपाटम् ॥ २ ॥ सख्यौ ॥
मणिमयमकर - मनोहरकुण्डल -
मण्डितगण्ड मुदारम् ।
पीतवसन मनुगुणमणिभूषणं -
अमलमुक्ताश्चितहारम् ॥ ३ ॥ सख्यौ ॥
विशदकदम्बतले मिलितं कलि-
कलुषभयं शमयन्तम् ।
मा मपि तरळ - तरङ्गदनङ्ग -
दृशा मनसा रमयन्तम् ॥ ४ ॥ सख्यौ ॥

After the words 'आश्रमं गताः' at line 4, page 64, add the following song to मन्द्यानाः—

XVI. रागः—रूपकतालः

पल्लवी

प्रियसखि! किं मुरसि -
वहसि हृदीशम् ।

अनुपल्लवी

हिमकरकिरणकलापकरञ्जित -
कैरवकोमलवेषम् ॥ प्रिय ॥

चरणाः

सकुतुकसरभस - सविनयसस्मित -
विरचितबहुविधरङ्गम् ।
मुकुलितविकसित - मुहुरावर्तित -
नर्तितनयनतरङ्गम् ॥ प्रिय ॥

प्रसरति तस्य च कनककणा दिव
विसदृशवचन मनेकम् ।
प्रचलसि ! निपतसि ! पश्यसि ! सचकितं
उज्झसि मलयजसेकम् ॥ २ ॥ प्रिय ॥

विहतपतिव्रत - धैर्यवशा दिव
गणयसि रिपु मिव कामम् ।
वन मभिनन्दसि ! गिरि मनुविन्दसि !
निन्दसि गृह मभिरामम् ॥ ३ ॥ प्रिय ॥

हृदयगतं पति मवलोकितु मिव
नमयसि मुखशशिबिम्बम् ।
तदनु विषद्यसि ! पुलकसि ! मुह्यसि !
वहसि कम्पमिव लम्बम् ॥ ४ ॥ प्रिय ॥

After "अनंगशयनोचितं कृतम्" at line 10, page 65, add the following song to करेणुका—

XVII. वसन्तरागः—रूपकतालः

पल्लवी

जनु रनुरञ्जय ! पश्य वसन्तम् ।

अनुपल्लवी

विकचवकुळकुल - सङ्कुलकानन -
कुसुममिषेण हसन्तम् ॥ जनु ॥

चरणाः

चम्पकचर्चित - चाप मुदञ्चित -
केसरकृततूणीरम् ।
मधुकरनिकर - कठोरकवचचय -
परिचितचारुशरीरम् ॥ १ ॥ जनु ॥

सरसिजसौरभ - सुभगसमीरण -
सुमुदितपथिकविषादम् ।
कोकिलकलरव - कपटलतातति -
विरचितमृणितनिनादम् ॥ २ ॥ जनु ॥

विकसितकिंशुक - कुसुम मसमशर -
विशिखविलासनिदानम् ।
युवतिमानमधु - पानसमुन्नत -
रसना मिव बिभ्राणम् ॥ ३ ॥ जनु ॥

तरुणलवङ्ग - रसालविचित्रित -
विविधकुसुमकमनीयम् ।
मदनापण मिव - दिशि दिशि निहितं
नानामणिरमणीयम् ॥ ४ ॥ जनु ॥

Substitute in place of stanza 14 at page 69— " तत् किं कामपि etc " the following song to हिडिम्बा—

XVIII. गुणकरीरागः—रूपकतालः

पल्लवी

मधु मधुरे - किमु करवाणि ?
विधौ विधुरे ।

चरणाः

कलितकलङ्क ममृतकरबिम्बम् ।
रचयति विषघटरुचि मविलम्बम् ॥ १ ॥ मधु ॥
अङ्गारकभरितेव हसन्ती ।
विकसदशोकलता विहसन्ती ॥ २ ॥ मधु ॥
प्रथयति मदनमहीपतिधाटी ।
अभिनवविकसितकिंशुकवाटी ॥ ३ ॥ मधु ॥
रिपु रिव मरुदपि चन्दनसङ्गी ।
यमपुञ्जी मिव पुष्यति भृङ्गी ॥ ४ ॥ मधु ॥

At the end of page 72, after the words "**सल्लॉपरूपममृतं सरसीरुहाक्ष्याः ॥**" add the following song to **भीमसेन**, with these introductory words: **अथवा, कृतं कृत मिदानीं प्रियासम्भोग वाञ्छया !**

XIX. **कमासुरागः—** **तालः**

पल्लवी

मा चर मनो ! मानिनीषु मा !
मारविवश मद्याशनीकाश ।

अनुपल्लवी

बाह्य वीक्षया मुह्यसि शोभया
गाह्य यदि पश्यसि द्रुह्यसि ननु ॥ मा ॥

चरणाः

मांसमूत्रमये ! माऽऽसां कुच मयेः
मा समुदीक्षये मुखे कफीये ।
मारवार्मये - मुग्ध ! महति निरये
मा लुठ केळये ! मैवं च ध्यायेः ॥ १ ॥ मा ॥

ऋक्षजात मपि - रेणूत्कर मपि,
रोमतती रपि - रुचा मणूनपि ।
रेफविधा मपि - रेरे ! रेफयितु रपि,
रेचितधी रहो रामाजनौघो ॥ २ ॥ मा ॥

नागहारधरं - नागाजिनहरं
नाकसुखङ्करं - नगाग्रचरम् ।
नारदसन्नुतं - देवं - नारायणाश्रितं
नादकलातीतं - नित्यं नमे स्तम् ॥ ३ ॥ मा ॥

Before line 6 at page 74, add the following song to **केशवदास** and to the members of his family, as they enter the stage—

XX. रागः— तालः

पल्लवी

भज! भुजगाभरण मळिकेक्षणम् ।

अनुपल्लवी

भज! भवभयभर - हरणं क्षणम् ॥ भज ॥

चरणाः

वाङ्मनसे अपि - यतो निवृत्ते,
वाति च वातो - यस्मा द्भीतो ।
वृक्ष इव स्तब्धो - दिवि य स्तिष्ठति
तं पुरहर मविकारम् ॥ १ ॥ भज ॥

वत्सं गौ रिव - धावन् ननु मते!
कुत्सित मपि यः - पावयते ।
वत्सलताबिरुदः - क्व परेषां ?
तत् स्मरहर मविकारम् ॥ २ ॥ भज ॥

धर्मपरायण - निर्मममानस -
शर्मद! नारायणा ऽऽदरतो ।
निर्मथनाय च - संसृतिसरितः
तं यमहर मविचारम् ॥ ३ ॥ भज ॥

After or in place of stanza 32 at page 76—"कनकरुचिर etc." add the following song to हिडिम्बा—

XXI. वराडीरागः—यतितालः

पल्लवी

पति मेकरसं चिरमभिलषितविलासम् ।
वीक्षेऽहं गुरुहर्षवशंवद - वदन मनङ्गनिवासम् ॥

चरणाः

कोमलरुचिर - कलेबरमण्डलं -
अधिगतपीतदुकूलम् ।
नीलनळिन मिव - पीतपराग -
पटलभरवलयितमूलम् ॥ १ ॥ पति ॥

तरळदृगञ्चल - चलनमनोहर -
वदनजनितरतिरागम् ।
स्फुटकमलोदर - खेलितखञ्जन -
युगमिव शरदि तडागम् ॥ २ ॥ पति ॥

विपुलपुलकभर - दन्तुरितं रति -
केळिकलाभि रधीरम् ।
मणिगणकिरण - समूहसमुज्वल -
भूषणसुभगशरीरम् ॥ ३ ॥ पति ॥
मामकवदन - विलोकनविकसित -
विविधविकारविभङ्गम् ।
जलनिधि मिव विधु - मण्डलदर्शन -
तरळिततुङ्गतरङ्गम् ॥ ४ ॥ पति ॥

After the words 'अहो! मनोज्ञ मस्या द्वितीययौवनम्!' at line 5, page 77, add the following song to भीमसेन—

XXII. देशवराडीरागः—अष्टतालः

पल्लवी

केय मिह निपुणा? । विलसति,
युवति रधिकगुणा ॥

चरणाः

स्मरसमरोचित - विरचितवेशा ।
गलितकुसुमदर - विलुलितकेशा ॥ १ ॥ केयं ॥
चञ्चलकुण्डल - दलितकपोला ।
मुखरितरसन - जघनगतिलोला ॥ २ ॥ केयं ॥

विपुलपुलकपृथु - वेपथुभङ्गा ।
श्वसितनिमीलित - विकसदनङ्गा ॥ ३ ॥ केयं ॥
विचलदलकलालि - ताननचन्द्रा ।
मदधरपान - सरभसकृततन्द्रा ॥ ४ ॥ केयं ॥

After the words "ब्राह्मणाः खल्वस्माकं कुलदैवतम्!" at line 13, page 82, add the following song to भीमसेन—

XXIII. रागः— तालः

पल्लवी

चिन्ता नास्ति किल । तेषां
चिन्ता नास्ति किल ॥

चरणाः

शमदमकरुणा - सम्पूर्णानाम् ।
साधुसमागमसङ्कीर्णानाम् ॥ १ ॥ चिन्ता ॥
कालत्रयजित - कन्दर्पाणाम् ।
खण्डितसर्वेन्द्रियदर्पाणाम् ॥ २ ॥ चिन्ता ॥
परमहंसगुरु - पदचित्तानाम् ।
ब्रह्मानन्दामृतमत्तानाम् ॥ ३ ॥ चिन्ता ॥

After line 7, page 85, add the following song to हिडिम्बा—

XXIV. गुर्जरीरागः—प्रतिमण्ठतालः

पल्लवी

शिव! शिव!! मया मुग्धया
वञ्चितो हृदयेशः!

चरणाः

किं हितं? किमिवा ऽहितं?
न विचिन्तितं हृदयेन।
शिक्षितं न च, वारितं न च
वा सखीनिचयेन॥ १॥ शिव॥

पाणिपद्मगतो गतो मणि
रेष किं रचयामि?।
दैवदत्त मवाप्यते कि
मितोऽपि हा कथयामि?॥ २॥ शिव॥

वारितो दायितो! वचो
न कृतं सखी निवहस्य।
युक्त मेव ततो यतो मम
यातना हृदयस्य॥ ३॥ शिव॥

किं भरामि? भणामि वा किमु?
ताडिता मदनेन ।
कुत्र यामि? करोमि किं न्विह?
शालिता कदनेन ॥ ४ ॥ शिव ॥

After the words 'वन मिति मन्ये' at line 14, page 85, add the following song to मन्दयाना—

XXV. वसन्तरागः—आडवतालः

पल्लवी

विसृज विषादं, मुञ्च विवादम् ।
सन्त्यज खरनिःश्वासम् ॥

अनुपल्लवी

सरसिजवदने! केळीसदने ।
रचयचरणविन्यासम् ॥ विसृज ॥

चरणाः

विरचय हारं! प्रसरतु तारं
मदनयशो महनीयम् ।
फल मनवरतं कलयतु सुकृतं
सकलभुवनकमनीयम् ॥ १ ॥ विसृज ॥

नन्दय सदयं पवनजहृदयं
जनय विलोचनरङ्गम् ।
रतिरसनिलयं योजय वलयं
नर्तय सतत मनङ्गम् ॥ २ ॥ विसृज ॥

लोचनयुगळे निर्जितकमले
कुरु कज्जल मभिरामम् ।
मनसिजलघिमा खञ्जनमहिमा
द्वय मपि भवतु विरामम् ॥ ३ ॥ विसृज ॥

लोचनकमलैः अविरळ ममलैः
अर्चय मनसिजदेवम् ।
चन्दनललितैः अपि दहरसितैः
अवलेपय बहुसेवम् ॥ ४ ॥ विसृज ॥

After line 17, page 85, add the following song to हिडिम्बा—

XXVI. गुर्जरीरागः—रूपकतालः

पल्लवी

सखि मे वल्लभं उदितविलासम् ।

अनुपल्लवी

सह सङ्गमय मया नतया, रति -
कौतुकदर्शितहासम् ॥ सखि ॥

चरणाः

अविकलयौवन - भूषितया, दर -
तरळितलोचनतारम् ।
किञ्चिदुदञ्चित - विहसितया, चल -
दविरळपुलकविकारम् ॥ १ ॥ सखि ॥

अवनतवदन - सरोरुहया, हृदि
समुदित मुदितमनोजम् ।
निवसन विनिहित - करतलया, चिर -
योजितपाणिसरोजम् ॥ २ ॥ सखि ॥

कपटकोपपटु - भाषितया, मुख -
सरसिजचुम्बनलोलम् ।
चकितविलोल - विलोचनया, कर -
परिकृतनीविनिचोलम् ॥ ३ ॥ सखि ॥

चलितकपोल - कलास्वनया, ऽधर -
निहिताधर मनुवेलम् ।
शिञ्जितरञ्जित - नूपुरया, कृत -
भुजयुगबन्धनखेलम् ॥ ४ ॥ सखि ॥

After stanza 54 at the end of page 86, add the following song to भीमसेन—

XXVII. गुर्जरीरागः—यतितालः

पल्लवी

हरि ! हरि !! हतादरतया,
त्वं गता कुपिते व ।

अनुपल्लवी

सापराधतया मया ऽपि न
वारिता ऽसि हिते व ॥ हरि ॥

चरणाः

चिन्तयामि तवाऽऽननं, कुटिलभ्रु! कोपभरेण ।
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण ॥ १ ॥ हरि ॥
त्वा महं हृदि सङ्गता मनिशं भृशं रमयामि ।
किं प्रिये! ऽद्य करोमि भामिनि? किं वृथा विलपामि॥२
तन्वि! खिन्न मसूयया हृदयं तवा ऽऽकलयामि ।
त न्न वेद्मि कुतो गताऽसि नतेन ते ऽनुनयामि ॥३॥हरि
दृश्यसे पुरतो गतागत मेव मे विदधासि ।
किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि ॥४॥ हरि ॥

At the end of page 87, add the following song to करेणुका—

XXVIII. देशाख्यरागः—एकतालः

पल्लवी

प्रेयसी तव विरहे मारुत!

चरणाः

स्तनविहितमपि हारमुदारम् ।
हा! मनुते कृशतनुरिव भारम् ॥ १ ॥ प्रेयसी ॥
सरसमसृणमपि मलयजपङ्कम् ।
पश्यति विषमिव वपुषि सशङ्कम् ॥ २ ॥ प्रेयसी ॥
श्वसितपवनमनुपमपरिणाहम् ।
मदनदहन मिव वहति सदाहम् ॥ ३ ॥ प्रेयसी ॥

दिशि दिशि किरति सजलकणजालम् ।
नयननळिन मिव विगळितनालम् ॥ ४ ॥ प्रेयसी ॥

त्यजति न पाणितलेन कपोलम् ।
बालशशिन मिव साय मलोलम् ॥ ५ ॥ प्रेयसी ॥

नयनविषय मपि किसलयतल्पम् ।
गणयति विहितहुताशनकल्पम् ॥ ६ ॥ प्रेयसी ॥

Substitute the following song in place of stanza 59 at page 88—"**कोपस्त्वया** etc." to **भीमसेन**—

XXIX. **मालवरागः—एकतालः**

पल्लवी

कमलदळलोचने! विरचय न रोषम् ।

अनुपल्लवी

मदनशरपावको भवति तनुपावको
वहसि कथ मुरसि नहि तोषम् ॥ कमल ॥

चरणाः

वद किमपि जायतां, अमृतरसवाहिनी
परिणमतु मधुरमधुरा ।
तनु रतनुलीलया पुलक मवगाहतां
पटु नटतु मम नयनतारा ॥ १ ॥ कमल ॥

विरचय दृगञ्चलं स्मरसमरचञ्चलं,
हर कमलदळमधुरिमाणम् ।
विकलय मदालस - भ्रूमरमधुमाधुरीं
शिथिलय चकोर महिमानम् ॥ २ ॥ कमल ॥

लुलितमणिकुण्डलं वदनशशिमण्डलं
किमिति विनियमसि वारम् ।
अथ रजनिनायको धृतललितखेटको
रचयतु धरणिवलयचारम् ॥ ३ ॥ कमल ॥

त्वमसि हृदि चन्द्रिका त्वमसि हृदि मालिका
त्वमसि मम चेतसि पटीरम् ।
सकलगुणसुन्दरी प्रणयतरुमञ्जरी
क्षिपसि किङ्कर मधीरम् ॥ ४ ॥ कमल ॥

Substitute the following song in place of stanza 61 at page 89—"परिम्लानं पीन etc." to भीमसेन—

XXX. विभासरागः—एकतालः

पल्लवी

किसलयशयनतले कुरु कामिनि!
चरणनलिनविनिवेशम् ।

अनुपल्लवी

तव पदपल्लव वैरिपराभवं
इद मनुभवतु सुवेशम् ॥ किसलय ॥

चरणाः

वदनसुधानिधि - गळित ममृत मिव
रचय वचन मनुकूलम् ।
विरह मिवा ऽपनयामि पयोधर -
रोधक मुरसि दुकूलम् ॥ १ ॥ किसलय ॥
अधरसुधारसं उपनय भामिनि
जीवय मृत मिव दासम् ।
त्वयि विनिहितमनसं विरहानल -
दग्धवपुष मविलासम् ॥ २ ॥ किसलय ॥
शशिमुखि ! मुखरय मणिरशनागुणं
अनुगुणकण्ठनिनादम् ।
श्रुतियुगळे पिकरुतविकले मम
शमय चिरा दवसादम् ॥ ३ ॥ किसलय ॥
मा मति विफल - रुषा विकलीकृतं
अवलोकित मधुनेदम् ।
लज्जित मिव नयनं तव विरमति
सृजसि वृथा रतिखेदम् ॥ ४ ॥ किसलय ॥
